संस्कृत-प्रचार-पुस्तकमाला सं० ३०

संस्कृत-प्रहसनम्

[संस्कृत-नाटकों के अभिनय में प्रहसन के रूप में प्रदर्शित करने योग्य संस्कृत के कुछ मनोरञ्जक दृश्य]

सार्वभौम संस्कृत-प्रचार-कार्यालय

वा रा ण सी

दाखी बाई सिहानिया ट्रस्ट

१८७ दादी सेठ अग्यारी लेन

बम्बई २ की

सहायता से प्रकाशित

संस्कृत प्रचार पुस्तकमाला सं० ३०

संस्कृत-प्रहसनम्



लेखक :—

श्रीवासुदेव द्विवेदी, वेदशास्त्री, साहित्याचार्यः

(संस्कृत-प्रचार-पुस्तकमाला—सम्पादकः)

सार्वभौम संस्कृत-प्रचार-कार्यालयः

वा रा ण सी

प्रकाशक—

सार्वभौम संस्कृत-प्रचार-कार्यालय

डी० ३८/११० हौज कटोरा

बाराणसी

तृतीयावृत्तिः १०००

मूल्यम् ७५ न० पै०

783

मुद्रक—

कल्पना प्रेस

रामकटोरा रोड, वाराणसी।

दो शब्द

नाटक, गीत तथा प्रहसन आदि मनोरञ्जक साधनों द्वारा किसी भी भाषा का सर्वसाधारण में बहुत सरलता एवं शीघ्रता से प्रचार किया जा सकता है, यह एक सर्वसम्मत अनुभव है। इसीलिए सर्वसाधारण जन-समाज में संस्कृत-भाषा के प्रचारार्थ कार्यालय द्वारा उक्त विषयों पर विविध पुस्तकों के प्रकाशन का आयोजन किया गया है और तदनुसार गीत और नाटकों की चार-पाँच पुस्तकें प्रकाशित भी की जा चुकी हैं।

प्रस्तुत पुस्तक प्रहसन-विषय पर कार्यालय का प्रथम प्रकाशन है जिसका यह तृतीय परिवर्द्धित संस्करण प्रकाशित किया जा रहा है। नामानुसार इस पुस्तक में कुछ ऐसे प्रहसन प्रस्तुत किये गये हैं, जो संस्कृत नाटकों के अभिनय के बीच-बीच में तथा सन्ध्या-विनोद (कैम्प फायर) के रूप में भी प्रयुक्त हो सकते हैं। इस पुस्तक के अधिकांश प्रहसन संस्कृतसाहित्य के आधार पर ही लिखे गये हैं, और जो आधार जहाँ से लिया गया है, उसका संकेत भी वहीं पर कर दिया गया है।

जहाँ तक इन प्रहसनों की उपादेयता का प्रश्न है यह निश्चित रूप से कहा जा सकता है कि ये प्रहसन पुस्तक के रूप में प्रकाशित होने के पूर्व से ही अनेक अवसरों पर अभिनीत हुए हैं और सामान्य शिक्षित समाज के भी मनोरञ्जन की दृष्टि से बहुत ही लोकप्रिय सिद्ध हुए हैं। इसकी लोकप्रियता का सबसे बड़ा प्रमाण यही है कि प्रथम संस्करण प्रकाशित होने के पश्चात् शीघ्र ही समाप्त हो गया, जिससे कि इसका द्वितीय और यह तृतीय संस्करण इतनी शीघ्रता से प्रकाशित करना पड़ा है।

इस प्रकार संस्कृत-प्रचार की दिशा में यह एक सफल प्रयास है और मुझे विश्वास है कि संस्कृत के विद्वान् एवं विद्यार्थी अपने-अपने विद्यालयों के विशिष्ट अवसरों पर इन प्रहसनों का प्रदर्शन कर इस प्रयास को सफल बनाने की कृपा करेगें।

दीपावलि २०२६ वि०
वाराणसी

विनीत
लेखक

विषय-सूची

१—व्यङ्ग्य-वन्दना १
२—तमालपत्रम् २
३—वैद्यो रोगिणश्च ४
४—कवि-सम्मेलनम् ८
५—भिक्षुकस्य महत्त्वाकांक्षा ११
६—बालकानां गोचारणम् १२
७—उदरम्भरिः शिष्यः १४
८—ज्योतिषाचार्यस्य शिक्षा १६
९—यथागुरुस्तथा शिष्यः १८
१०—कन्यापितृत्वं खलु नाम कष्टम् २०
११—विधातुर्मूढता २२
१२- दरिद्रस्य दुरवस्था २४
१३—अभिनवानि षट् शास्त्राणि २६
१४—वृद्धो नरः कष्टशतानि भुङ्क्ते २८
१५—नूतनं धर्मशास्त्रम् २९
१६—श्वसुरालये गमनम् ३१
१७ भैरवाचार्यः ३३
१८—भज गोविन्दम् ३५
१९—समस्यापूर्तिः ३६
२०—पुरोहितानां वृत्तिः ४०
२१—यथाप्रश्नस्तथोत्तरम् ४२
२२—अहोचलचित्रदर्शकाणां पुरुषार्थः ? ४५
२३—विद्यालये विलम्बादागमनस्य कारणम् ४६
२४—अक्षरलेखनस्य अभ्यासः ४७

संस्कृत-प्रहसनम्

१—व्यङ्ग्य वन्दना

(प्रहसनारम्भे हास्यजनकवेषधारिणः पञ्च जनाः हास्यजनक-
चेष्टाभिः पृथक्-पृथक् बन्दनां कुर्वन्ति)

(१)

यत्र भार्यागिरो वेदा यत्र धर्मोऽर्थसाधनम् ।
यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नमः ॥

(२)

छेदश्चन्दन-चूत-चम्पकवने रक्षा करीरद्रुमे
हिंसा हंस-मयूर-कोकिल कुले काकेषु नित्यादरः ।
मातङ्गेन खरक्रयः समतुला कर्पूर-कार्पासयोः
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥

(३)

कुरुते स्वमुखेनैव बहुधान्यस्य खण्डनम् ।
नमः पतनशीलाय मुसलाय खलाय च ॥

(४)

उन्निद्र-कन्दल-दलान्तर-लीयमान—
गुञ्जन्मदान्ध-मधुपाञ्चित-मेघकाले ।
स्वप्नेऽपि यः प्रवसति प्रविहाय कान्तां
तस्मै विषाणरहिताय नमो वृषाय ॥

१—२—३—४—सुभाषितग्रन्थेभ्यः ।

२—तमालपत्रम्

(तमालचूर्णं रचयतः, नस्यं जिघ्रतः तथा तत्प्रशंसां कुर्वतः ग्राम्यवेषधारिणः पुरुषस्य प्रवेशः)

प्रथमः—अहो ! कीदृशं पवित्रं वस्तु इदं तमालपत्रं वर्तते ! वेदे शास्त्रे सर्वत्र अस्य महिमा वर्णितः अस्ति । यथा त्रिपथगा गंगा सर्वं जगत् पवित्रं करोति तथैव तमालपत्रम् अपि सर्वं जगत् पवित्रं करोति ।

क्वचित् हुक्का क्वचित् थुक्का क्वचिन्नासाग्रवर्तिनी ।
इयं त्रिपथगा गंगा पुनाति भुवनत्रयम् ॥

द्वितीयः—अरे मूर्ख ! कथं वृथा अनर्गलं प्रलापं करोषि ? ईदृशम् अपवित्रम् अनर्थकरं च वस्तु सभायां निर्भयो भूत्वा एवं प्रशंससि ?

प्रथमः—अरे ! किं तमालपत्रम् अपवित्रं वस्तु वर्तते ! शास्त्रेऽपि तमालपत्रस्य पवित्रताया वर्णनं वर्तते । श्रूयताम्, मम श्वसुरः महापण्डितः आसीत् । स एकं श्लोकं कथयति स्म—

विडौजाः पुरा पृष्टवान् पद्मयोनिं
धरित्रीतले सारभूतं किमस्ति ।
चतुर्भिर्मुखैरुत्तरं तेन दत्तम्
तमालं तमालं तमालं तमालम् ॥१॥

द्वितीयः—ओं, श्रुतं प्रमाणम् । तर्हि कथ्यताम् , कस्मिन् ग्रन्थे अयं श्लोकः अस्ति ?

प्रथमः—अहं ग्रन्थस्य नाम न जानामि । मम श्वसुरः महान् पण्डितः आसीत् । स एव इमं श्लोकं कथयति स्म ।

द्वितीयः—आः, तर्हि महत् अकाट्यं प्रमाणं वर्तते ? तव श्वसुरस्य वाक्यं वेदवाक्यम् अस्ति !

१—सुभाषितरत्नभाण्डागारम् ।

प्रथमः—अरे दुष्ट ! कथं मम श्वसुरस्य उपहासं करोषि ! यदि तमालपत्रं शास्त्रविरुद्धं तथा अपवित्रं वर्तते तर्हि कथं सर्वे पण्डिताः तमालपत्रं भक्षयन्ति ?

द्वितीयः—किं पण्डिताः अपि तमालपत्रं भक्षयन्ति !

प्रथमः—आं, पण्डिता अपि भक्षयन्ति। वैदिकाः ज्योतिर्विदः पौराणिकाः वैद्याः व्याकरणाचार्याः साहित्याचार्याः वेदान्ताचार्याः किमधिकं धर्मशास्त्राचार्या अपि तमालपत्रं भक्षयन्ति। न च केवलं गृहे, प्रत्युत यज्ञे, मन्दिरे, विद्यालये, पूजायां, पाठे, सभायां, तीर्थे, आश्रमे सर्वत्र निस्सङ्कोचं भक्षयन्ति।

द्वितीयः—यद्येवं तर्हि एष महान् अनर्थविषयः। तथापि पण्डितानां भक्षणेन तमालपत्रस्य प्रामाणिकता न सिद्ध्यति। नखलु अस्माकं पण्डिताः प्रमाणं प्रत्युत शास्त्रं प्रमाणं बुद्धिश्च प्रमाणं वर्तते। साधारणबुद्ध्याऽपि विचार्यमाणे तमालपत्रस्य उत्तमता न सिद्ध्यति। अतएव लिखितं वर्तते--

न स्वादु नौषधमिदं न च वा सुगन्धि
नाऽक्षिप्रियं किमपि शुष्कतमाकुचूर्णम्।
किं चाक्षिरोगजनकं च तदस्य भोगे
बीजं नृणां नहि नहि व्यसनं विनाऽन्यत्। १ ॥

प्रथमः-अस्तु, मन्ये अहं ते वचनम् यत् पण्डिता अनुचितं कुर्वन्ति। परन्तु अनेके अंग्रेजी-अध्यापका यत् बीड़ी-सिगरेटादिकं पिबन्ति, एकम् एकम् च "बण्डलं" एकैकस्मिन् दिने समाप्तं कुर्वन्ति तत् किं तेऽपि अनुचितं कुर्वन्ति ? ते तु सभ्यमानवाः सन्ति !

द्वितीयः—(हसित्वा) अरे, अंग्रेजी-अध्यापकानां किमपि पुच्छं वर्तते यत् ते अनुचितं न कुर्वन्ति ! शृणु तावत्। तमालपत्रं धूमपानं वा इदं सर्वमपि स्वास्थ्यस्य कृते महत् हानिकरं वर्तते। द्रव्यस्यापि अपव्ययो

१—सुभाषितरत्नभाण्डागारम्।

भवति। समाजे निन्दापि जायते। अतः कदापि तमालभक्षणं धूमपानं वा न कर्तव्यम्। दूरे निक्षिप निजं सर्वं तमालपत्रम्।

प्रथमः—गच्छ गच्छ। यावत् सर्वे पण्डिताः मास्टराश्च परित्यागं न करिष्यन्ति तावत् अहमपि परित्यागं न करिष्यामि। (निर्गच्छति)

द्वितीयः—मा परित्यागं कुरु। कः त्वया सह शिरःस्फोटं कुर्यात्।

सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।

(निष्क्रान्तः)

३—वैद्यो रोगिणश्च

(एकेन हस्तेन छत्रं धारयतः एकेन हस्तेन च मक्षिका अपसारयतः एकस्य मलिनवेषस्य वैद्यस्य प्रवेशः)

वैद्यः—(स्वगतम्)

वैद्योऽहं व्याधिवर्गाणामाश्रयोऽप्ययशोनिधिः।
मया चिकित्सितः सद्यो मार्कण्डेयो विनश्यति॥ १

अपि च—

तिष्ठन्त्वौषधयः सर्वाश्चिकित्सापि च तिष्ठतु।
मम दर्शनतो रोगी किल प्राणैर्विमुच्यते॥ २

(घटीयन्त्रं दृष्ट्वा) अहो रोगिणामवलोकनाय नगरे परिभ्रमतो मम महती वेला अतिक्रान्ता। तत् शीघ्रमेव औषधालयमुपतिष्ठामि। रोगिणः प्रतीक्षमाणा भविष्यन्ति। (परिक्रामति)

(औषधालयं गत्वा आसने उपविश्य रोगिणः प्रति) कथयन्तु, किं निवेदनीयं वर्तते?

१—२—हास्यार्णवः।

एकः रोगी—महाराज ! गतदिने रात्रौ मम शिरसि महती वेदना समुत्पन्ना । तदवलोक्यतां किं नाम कारणं वर्तते ?

वैद्यः—(नाडिकां धृत्वा) त्वं खलु श्लेष्मणा-कफेन पीडितोऽसि । तदेतस्य औषधं वर्तते—

वरटो भृङ्गराजश्च जलौका वाथ वृश्चिकः
घ्राणे नेत्रे च दातव्यः सद्यः श्लेष्मविनाशकृत् ॥ १

द्वितीयः रोगी—(गात्राणि कण्डूयन्) वैद्य महाराज ! कण्डुना भृशं पीडितोऽस्मि । रात्रौ दिने वा शान्तिं न लभे । कश्चित् तत्काल-लाभकारी उपायः क्रियताम् ।

वैद्यः—शृणु, एतस्य रामबाणौषधिं कथयामि । तस्य एकवारं प्रयोगेण कदापि पुनः कण्डूतिर्न पीडयिष्यति त्वाम् । लिखितं वर्तते—

वारिपर्णीचयं शीतं घृष्ट्वा वृश्चिकमग्रतः ।
दातव्यो वानरीरेणुः सद्यः कण्डुहरः परः ॥

रोगी—महती कृपा ।

तृतीयः रोगी—महाराज ? मम सर्वाङ्गेषु अहोरात्रं महान् असह्यो दाहो भवति ।

वैद्यः—नाडिकां देहि । (नाडिकां धृत्वा) आः दाहस्तु महान् प्रबलः प्रचुरश्च दृश्यते । एतस्य अतिशीघ्रतया उपायं कुरु । अन्यथा अनेके उपद्रवा भविष्यन्ति ।

रोगी—एतदर्थमेव आगतोऽस्मि । कश्चिदुपायो निर्दिश्यताम् ।

वैद्यः—(पुस्तकं दृष्ट्वा) शृणु, लिखितं वर्तते ।

१—हास्यार्णवः ।

श्रीखण्डमण्डित-कलेवर-वल्लरीणां
मुक्ताफलाकुल-विशाल-कुचस्थलीनाम् ।
वैदग्ध्य-मुग्ध-वचसां सुविलासिनीनां
आलिङ्गनं सकलदाहमपाकरोति ॥ १

गच्छ, यदि सम्भवति, अद्यैव एतस्य शुभारम्भं कुरु ।

वैद्यः—(चतुर्थरोगिणं प्रति) तव किं निवेदनीयं वर्तते ?

चतुर्थः रोगी—पश्यतु भवान्, मम को नाम रोगो वर्तते ?

वैद्यः—(नाडिकां, नेत्रं, जिह्वां च दृष्ट्वा) तव शरीरे अनेके व्याधयः सन्ति । परन्तु चिन्ताया आवश्यकता-नास्ति ।

रोगी—तर्हि एतदर्थं मया किमनुष्ठेयम् ?

वैद्यः—एतदर्थं त्वया—

यस्य कस्य तरोर्मूलं येनकेनापि पाचितम् ।
यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥

पञ्चमः रोगी—(कासश्वासादिकमभिनीय) महाराज ! अहं प्रातःकाले एव समागतः । महान् विलम्बोऽभूत् ।

वैद्यः—आगच्छ-आगच्छ । पश्यामि । (नाडिकां धृत्वा विस्मयं नाटयति) श्वासकासौ तु तव अतिवृद्धिं गतौ । अथ पिपासा ते अधिका लगति ?

रोगी—ओम् ।

वैद्यः—हिक्काऽपि आगच्छति ?

रोगी—ओम्, अनेकवारम् ।

वैद्यः—अन्नं रोचते न वा ?

रोगी—न रोचते ।

वैद्यः—उदरे पीडाऽपि भवति ।

१—वैद्यजीवनम् ।

रोगी—अतीव पीड़ा भवति।

वैद्यः—अथ पुरीषोत्सर्गः ?

रोगी—तस्य तु गणनैव नास्ति।

वैद्यः—शतम्, त्वयि अनेके रोगा वर्तन्ते ? एतदर्थं "गोविन्द दामोदर माधवेति" इति नाम्नां स्मरणं कुरु। ग्रन्थे लिखितं वर्तते—

तृट्-श्वास-कास-ज्वर-शोफ-मूर्च्छा-
हिक्कान्नविद्वेषण-क्षान्ति-शूलैः।
युक्तोऽतिसारी स्मरतु प्रसह्य,
गोविन्द दामोदर माधवेति ॥ १

वैद्यः—अन्योऽपि कश्चित् रोगी वर्तते ?

षष्ठः—ओम्।

वैद्यः—तर्हि शीघ्रमागच्छ। अहं तत्कालमेव अन्यत्र गन्ताऽस्मि। (रोगिणः नाडिकां धृत्वा साश्चर्यम्) तव तु शनैः शनैः नपुंसकता वर्द्धमाना दृश्यते ! अल्पकालेनैव तव सर्वथा पुरुषत्वनाशो भविष्यति। अनुभूयते त्वया इदम् ?

रोगी—ओम्, अनुभूयते।

वैद्यः—तर्हि श्रूयताम्—

ताम्बूलं मधु कुसुमस्रजो विचित्राः
कान्तारं सुरतनवा विलासवत्यः।
गीतानि श्रवणहराणि मिष्टमन्नं
क्लीवानामपि जनयन्ति पञ्चबाणम् ॥ २

एतेषां संग्रहस्य सेवनस्य च यथाशीघ्रमारम्भं कुरु।

रोगी-एतावन्ति वस्तूनि तु मम कृते दुर्लभानि एव सन्ति। सुलभः उपायो निर्दिश्यतां कश्चित्।

१—२—वैद्यजीवनम्।

वैद्यः—एवम्, तर्हि चलचित्राणामवलोकनं कुरु। तेन एकसप्ताहेनैव ते अद्भुतं कामोद्दीपनं भविष्यति। इदं तु सुलभं वर्तते?

रोगी—इदं सुलभं वर्तते। चलचित्रं मम समीपे एव वर्तते।

वैद्यः—तदा किं वक्तव्यम्? कामोद्दीपकेषु औषधेषु अयं नवीनः आविष्कारः अस्ति। शीघ्रमेव च चमत्कारं दर्शयति।

(सर्वे गच्छन्ति)

———

४—कवि-सम्मेलनम्

(पुस्तकपत्रादिहस्ताः पञ्च सप्त वा कवयः समागच्छन्ति)

प्रथमः—मित्रवर! अद्य वयं भृशं परिश्रान्ताः स्म। तदिदानीं कवितापाठेन मनो विनोदयाम इति मे शोभनं प्रतिभाति।

द्वितीयः—नितान्तं समयोचितः प्रस्तावः। उक्तं च—

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥

तृतीयः—तर्हि उपविश्यताम् तावत्। विलम्बस्य किं कारणम्? (सर्वे उपविशन्ति।)

चतुर्थः—तत् कस्यां भाषायां कवितापाठो भविष्यति! हिन्दी-भाषायां संस्कृते वा अथवा उर्दू-अंग्रेजी-भाषयोः!

पञ्चमः—मम तु इदं रोचते, खिचड़ी-भाषायामेव कविता-पाठो भवेत् (सर्वे हसन्ति)

षष्ठः—तदलं विलम्बितेन। विधीयतां शुभारम्भः केनापि।

प्रथमः—तर्हि अहमेव तावत् श्रीगणेशं करोमि। श्रूयताम्। कविताया विषयः अस्ति सन्ध्याविहारः।

एकस्मिन् दिवसावसानसमये मैं था गया बाग में।
(एकः—साधु साधु! मैं था गया बाग में)
काचित् तत्र कुरङ्गशावनयना गुल तोड़ती थी खड़ी।
(द्वितीयः—तदा शोभनः संयोगः आसीत्)
उन्नद्-भ्रू-धनुषा कटाक्षविशिखैः घायल किया था मुझे।
(तृतीयः—अहो, तर्हि महान् अनर्थः संवृत्तः)
तत् सीदामि सदैव मोहजलधौ हे दिल शुकारो गुजर् ॥१
(चतुर्थः—हन्त? तर्हि भगवानेव शरणम्)

द्वितीयः—अथ मदीया कविता श्रूयताम्। विषयः अस्ति "मनस्यन्यद् वचस्यन्यत्।"

दुष्कृतिनां प्रकृतिः किल घोरा।
मानसबुद्धिरतीव कठोरा॥
वाक् सुधया सदृशी रसपूरा।
मुँह में राम बगल में छूरा॥२
(सर्वे हसन्ति)

तृतीयः—अहमिदानीं संस्कृते बालसाहित्यं लिखामि। तस्य एकं पद्यं श्रूयताम्—

मुन्नू मधुरं गीतं गाता।
चुन्नू चिपुटं दध्ना खाता॥
कल्लू खेलति हरदम खेल।
मल्लू खादति ठेलंठेल॥३

चतुर्थः—मया आयुर्वेदविषये एकः ग्रन्थः लिखितः अस्ति। तस्य एकं पद्यं श्रावयामि—

१—अब्दुल रहीम खानखाना। २—गुमानी कविः। ३—सम्पादकस्य।

ज्वरार्दिता या कटुकान् कषायान्
न चेत् पिवेत् किं वद वैद्य देयम् ।
निबोध हंसी-मधुर-प्रचारे
वहाँ वनप्सा, शरबत पिला दे ॥ १

(सर्वे हसन्ति)

पञ्चमः—मया "खेटकौतुकं" नाम एकं ज्यौतिषविषये लघु पुस्तकं लिखितम्, तस्य इदमेकं पद्यं वर्तते—

यदा मुस्तरी कर्कटा वा कमाने
यदा चश्मखोरा जमी वासमाते ।
तदा ज्योतिषी क्या लिखेगा पढ़ेगा
हुआ बालका बादशाही करेगा ॥ २

षष्ठः— मया सम्प्रति "बिहारी सतसई" पद्यानां हिन्दी-अंग्रेजी-भाषयोरनुकरणं क्रियते । तस्य दोहाद्वयं श्रावयामि । प्रथम—कर मुरली कटि काछनी, उर बैजन्ती माल । यो बानिक मो मन बसो सदा बिहारी लाल" एतस्य अनुकरणं श्रूयताम् । विषयः वर्तते-जैन्टिलमैन वन्दना—

हैट शिरसि बूटं पदे, घड़ी छड़ी अधिपाणि ।
अधिकटि पतलूनं दधत् रूपं हृदि करवाणि ॥ ३

द्वितीय दोहा—"मेरी भववाधा हरो राधा नागरि सोय । जा तन की झाईं परे स्याम हरित द्युति होय" इत्यस्य अनुकरणं श्रूयताम् । विषय-ज्ञानं तु दोहाश्रवणादेव विदग्धानां भविष्यति । दोहा वर्तते—

भव-बेड़ीमपनयतु मे, लेडी सा मतिधाम ।
मिस्टर-कर-कमलं भवति, यस्याः कण्ठे दाम ॥ ४

(प्रत्येकं कवितापाठस्य अन्ते सर्वे हसन्ति, बाढ़म्, शोभनं शोभनमित्यादिपदैः प्रशंसन्ति च)

१—गुमानी कविः । २—खेटकौतुकम् । ३—४—सुप्रभाते प्रकाशितं मिष्टरमाहात्म्यम् ।

५—भिक्षुकस्य महत्त्वाकांक्षा

(हस्ते सक्तुपरिपूर्णं मृत्पात्रमादाय एकस्य भिक्षुकस्य प्रवेशः)

भिक्षुकः—अहह ! भिक्षायामपि महत् कष्टं वर्तते । भ्रामं भ्रामं भृशं परिश्रान्तोऽस्मि ! ग्रामे ग्रामे गम्यते, गृहे गृहे स्थीयते, द्वारे द्वारे आक्रन्द्यते, जनो जनो याच्यते तथापि कश्चित् ध्यानं न ददाति ।

अद्य बहुदिनानन्तरं भोजनावशिष्टैः सक्तुभिः इदं पात्रं परिपूर्णतां गतं वर्तते । (वारं वारं प्रसन्नमनाः पश्यति) महता यत्नेन सञ्चिता इमे सक्तवः । तदिमान् कदापि न भक्षयिष्यामि । सर्वदैव च निधिरूपेण रक्षिष्यामि ।

अथवा किं संरक्षणेन । यदा देशे दुर्भिक्षं भविष्यति तदा सक्तूनिमान् अहं विक्रेष्यामि । तेन अवश्यमेव प्रभूतानि रूप्यकाणि मिलिष्यन्ति । तैः रूप्यकैः अजाद्वयं मया क्रेतव्यम् । ततस्ताभ्यां बहवः अजा भविष्यन्ति । अजानां विक्रयेण अनेका गाः ग्रहीष्यामि । ततो गोभिर्महिषीः । महिषीभिश्च बडवाः । बडवानां विक्रयात् पुनः प्रभूता अश्वा भविष्यन्ति। तेषां च विक्रयात् पर्याप्तं सुवर्णं भविष्यति । सुवर्णेन चतुःशाल गृहं निर्मास्यामि । ततः किं वक्तव्यम् ? मम भाग्योदय एव भविष्यति । मम वैभवं दृष्ट्वा कश्चिद् ब्राह्मणो गृहमागत्य कन्यां दास्यति । तत्सकाशात् पुत्रो मे भविष्यति । तस्याहं सोमशर्मा इति नाम करिष्यामि । ततस्तस्मिन् जानुचलनयोग्ये सञ्जाते अहं अश्वशालायाः पृष्ठदेशे उपविष्टः पुस्तकानि पठन् भविष्यामि ।

अत्रान्तरे मम पुत्रः सोमशर्मा मां दृष्ट्वा जननीक्रोडात् जानुचलनपरः अश्वखुरासन्नवर्ती मत्सांमपम् आगमिष्यति । ततोऽहं ब्राह्मणीं कोपाविष्टः वदिष्यामि—गृहाण तावद् बालकम्, अन्यथा अश्वः पादप्रहारं करिष्यति । सापि गृहकर्मव्यग्रतया अस्मद्वचनं न श्रोष्यति । ततोऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि ।

(यावत् पादप्रहारं करोति तावत् संयोगात् सक्तुपात्रमेव भिद्यते । भिक्षुकश्च अधोमुखो रुदन् सक्तून् उत्थापयति पश्चात्तापं च कुरुते)

अहो मे दौर्भाग्यम् । अथवा असम्भववस्तूनां चिन्ताया ईदृशमेव फलं भवति (रुदन् सक्तुपात्रं च अवलोकयन् निष्क्रामति) *

६—बालकानां गोचारणम्

(हस्ते दण्डमादाय गोचारकवेषधारिणः पञ्च सप्त लघु-लघु-बालकाः हसन्तः खेलन्तश्च प्रविशन्ति)

विहारी (परितो विलोक्य) अरे गोपाल ! जानासि मम कुत्र गौश्चरति ?

गोपालः—नहि भोः, अहं तु न जानामि तव गौः कुत्र चरतीति ।

मोहनः—अरे चिन्तां मा कुरु । अत्रैव सर्वा गावो घासं चरन्ति ।

कुमारः—भ्रातः ! यदि एवं, तर्हि यावद् गावः चरन्ति तावत् एकं गीतं गीयताम् ।

सर्वे—अवश्यमेव गीतं गीयताम् ।

मुरली—तर्हि अस्माभिः सर्वैः बालकैः मिलित्वा गातव्यम् । अहं तावत् प्रथमं गायामि, पश्चात् सर्वैः मिलित्वा गातव्यम् । गीयताम् —

अजे व्रजैकभूषणं सदा निरस्त-दूषणम् ।
नवीन-मेघ-सुन्दरं नमामि गोपुरन्दरम् ॥
यशोमती-यशोधरं व्रजङ्गना-मनोहरम् ।
सुरारि-सन्निकन्दनं नमामि नन्दनन्दनम् ॥

---

* पञ्चतन्त्रम्

अधीर-किङ्किणीधरं हिरण्य-हारि-नूपुरम् ।
व्रजाङ्गणे विहारिणं नमामि गव्यहारिणम् ॥ १

(सर्वे गायन्ति तालिं दत्त्वा नृत्यन्ति च)

मोहन ! त्वया एकं विरहागीतं गीयताम् । तव विरहागीतानि अतीव मनोहराणि भवन्ति ।

सर्वे—ओम् अवश्यमेव एकं विरहागीतं भवेत् ।

मोहनः—यदि भवतामीदृशी इच्छा वर्तते तर्हि एकं विरहागीतं श्रावयामि । श्रूयताम्—

विहरति हरिरिह मधुवनकुञ्जे सखि ! सहचर-शिशु-निकरेण ।

गायति मधुर-मधुर-मृदु-गानम् ,
जनयति मुरली-ललिततम-तानम् ,
खेलति गोप-युवक-जन-संगे,
रचयति चारु तिलकवरमंगे,

गाश्चारयति नवल तृण-पुञ्जे सखि ! सहचर-शिशु-निकरेण ।
सहचर-शिशु-निकरेण समं सखि ! जनजन-हृदय-हरेण ॥ २

सर्वे—अतिसुन्दरम् । अतिशोभनम् ।

मुकुन्दः--(धावन् आगत्य) अरे ! अत्र सर्वे गीतं गायन्ति । तत्र च सर्वा गावो गत्वा बाबूसाहबस्य धान्यं चरन्ति । अद्य सम्यक् कुद्दयिष्यति ।

(सर्वे अरे रे कुर्वन्तो धावन्तश्च निष्क्रामन्ति)

———

१—हरिराय-वाङ् मुक्तावली । २—सम्पादकस्य ।

७--उदरम्भरिः शिष्यः

(एकः कुण्ठकनामा युवा भिक्षुकः विद्यार्थी प्रविशति वारं वारं च भिक्षापात्रस्थितां भिक्षां निरूपयति)

कुण्ठकः—(सहर्षम्) अहो अद्य मम बहुदिनानन्तरं भाग्योदयो जातः यदद्य यजमानस्य गृहे मया एतावन्ति लड्डुकानि प्राप्तानि । तत् गणयामि तावत्, कियन्ति सन्ति इमानि । (उपविश्य गणयति) आः बहूनि सन्ति । एकम् द्वे त्रीणि चत्वारि पञ्च षट् सप्त अष्टौ नव दश एकादश द्वादश त्रयोदश चतुर्दश पञ्चदश तथा षोडश लड्डुकानि सन्ति । तत् शीघ्रं चलित्वा गुरवे समर्पयामि ?

(इतस्ततो भ्रमित्वा उदरं हस्तेन परामृशन्)

आः अद्य अधिक-गमनागमनाभ्यां अत्यन्तं परिश्रान्तोऽस्मि । बुभुक्षा च इदानीं माम् अतितरां बाधते ! तत् किं मया भोक्तव्यम् निर्जने स्थाने (चिन्तयति) आम्, भोजनस्य उपायः परिज्ञातः । यदा अहं आश्रमं गत्वा गुरुवे षोडशलड्डुकानि दास्यामि तर्हि स अष्टौ लड्डुकानि मह्यम् अवश्यं दास्यति । तदहम् आत्मनः अर्धभागं अत्रैव पश्यामि । का हानिः ?

(अष्टौ लड्डुकानि भक्षयति)

इदानीम् अष्टौ लड्डुकानि अवशिष्टानि । इमानि अहं गुरवे समर्पयिष्यामि । [किंचित् चलित्वा] परन्तु यदा अहं अष्टो लड्डुकानि गुरवे दास्यामि तदा स चत्वारि लड्डुकानि मह्यम् अवश्यं दास्यति । तर्हि कथं न अत्रैव अहम् आत्मनः भागं पुनरपि भक्षयामि ?

[चत्वारि पुनः भक्षयति]

इदानीं मम बुभुक्षानिवृत्तिः कथमपि संजाता । इतः परं शीघ्रम् गत्वा मया चत्वारि लड्डुकानि गुरुभ्यः समर्पणीयानि । तस्यापि सम्प्रति आहारवेला अतिक्रामति ।

(आश्रमं प्रति गच्छति)

गुरुः—(चिन्तां नाटयन्) प्रातः काले एव मया कुण्ठको भिक्षायै यजमानस्य गृहं प्रेषितः परं अद्यापि न समागच्छति। किं कारणं बिलम्बस्य ? इदानीं च मम भिक्षाग्रहणवेला अतिक्रामति। कुण्ठकोऽपि वराकः बुभुक्षितो भविष्यति।

कुण्ठकः—(सतम्भ्रमं प्रविश्य) गुरो ! अद्य इमानि लड्डुकानि प्राप्तानि। [इति तस्य पुरस्तात् निक्षिपति]

गुरुः—किं भोः अद्य केवलं यजमानेन लड्डुकानि एव दत्तानि ? तान्यपि चत्वारि एव ?

कुण्ठकः—नहि, तेन षोडश लड्डुकानि दत्तानि परं मार्गे द्वादश लड्डुकानि मया एव भक्षितानि ?

गुरुः—(क्रुद्धो भूत्वा) कथं भक्षितानि ?

कुण्ठकः—अनेन प्रकारेण [इति द्वे पुनः भक्षयति]

गुरुः—[दुःखं दर्शयन्] अहो, शास्त्रेषु लिखितं वर्तते यत् —

मूर्खशिष्यो न कर्तव्यो गुरुणा सुखमिच्छता।

तदद्य मया मूर्खशिष्यस्य फलं लब्धम्। [कुण्ठकं प्रति—] तद् इमे अपि द्वे लड्डुके त्वमेव भक्षय।

कुण्ठकः—[सहर्षं गृह्णन्] गुरोः आज्ञायाः कथम् उल्लङ्घनं करिष्यामि। [ते अपि द्वे भक्षयति]।

[गुरुः कोपाविष्टः तूष्णीं निष्क्रामति]

कुण्ठकः—मम गुरुः महान् दयालुः अस्ति। स्वकीयमपि भागं मह्यमेव दत्तवान्। यदि एवमेव प्रतिदिनं भविष्यति तर्हि अहम् एकमासेन भीमसेनो भविष्यामि।*

निष्क्रान्तः।

---

*—भरटकद्वात्रिंशिका

८—ज्यौतिषाचार्यस्य शिक्षा

[अध्यापकासने एकः त्रिपुण्डधारी उष्णीषवेष्टितशिराः ज्यौतिषाचार्यो विराजते। तत्र केचन विद्यार्थिनः आगच्छन्ति]

आचार्यः—आगच्छत, किं अद्यापि किञ्चित् पठनीयमवशिष्यते ?

प्रथमः—गुरो ! ज्यौतिषशास्त्रस्य तु अस्माभिः प्रायेण सर्वाण्यपि प्रधानपुस्तकानि पठितान्येव। किमपि अवशिष्टं नास्ति। इदानीं वयं कांश्चित् गुप्तविषयान् ज्ञातुमिच्छामः।

द्वितीयः—अहमपि एतदेव इच्छामि येन जनता अस्माकं चमत्कारेण प्रभाविता स्यात्।

अन्ये—श्रीमन्, वयमपि एतदेव वेदितुं कामयामहे।

आचार्यः—अस्तु यदि सर्वेषामीदृशी एव इच्छा अस्ति तर्हि इदमेव श्रूयताम् ! किन्तु इदं रहस्यं सर्वत्र न प्रकटीकरणीयम्।

प्रथमः—नहि गुरो ! सर्वत्र गोपनीयं रक्षिष्यामः।

आचार्यः—अस्तु, श्रूयतां तर्हि।

सर्वं केटिद्वयोपेतं सर्वं कालद्वयावधि।
सर्वं व्यामिश्रमिव च वक्तव्यं दैवचिन्तकैः ॥ १

एष तावत् ज्यौतिषशास्त्रस्य मूलमन्त्रः अस्ति। यदि कश्चित् पुरुषः आगत्य कञ्चित् प्रश्नं करोति तदा ज्योतिर्विदा पण्डितेन तथा अस्पष्टं उत्तरं देयं यत् नकारे स्वीकारे तथा भूते भविष्यति च उभयत्र समन्वितं स्यात्। किन्तु अत्र वाक्चातुर्यस्य आवश्यकता भवति।

प्रथमः—ओम् इदं तु प्रभावविस्तारस्य महत् अस्त्रं वर्तते।

द्वितीयः—अहम् अद्यारभ्यैव एतस्य अभ्यासं करिष्यामि।

१—सभारञ्जनशतकम्

सर्वे—अति शोभनम् अति शोभनम् ।

आचार्यः—अथ द्वितीयं श्रूयताम् । प्रायः सर्वे जना आयुर्विषये प्रश्नं कुर्वन्ति दीर्घजीवनं च आत्मनः इच्छन्ति । तत्र चतुरेण पण्डितेन किं वक्तव्यमित्युच्यते ।

आयुः प्रश्ने दीर्घमायुर्वक्तव्यं दैवचिन्तकैः ।

यदि कश्चित् आयुःप्रश्नं कुर्यात् तर्हि सर्वेषां कृते दीर्घजीवनमेव वक्तव्यम् ।

यतः—

जीविता बहु मन्यन्ते मृताः पृच्छन्ति किं पुनः ॥ १

[सर्वे हसन्ति]

प्रथमः—द्रव्योपार्जनस्य अयं महान् निष्कण्टको मार्गः प्रदर्शितः ।

द्वितीयः—ईदृशानेव उपायान् वयं ज्ञातुमिच्छामः ।

आचार्यः—अरे चतुराणां कृते तु अनेके उपार्जनोपायाः सन्ति । अस्माकं पितृव्यस्तु जनानां कुण्डली दृष्ट्वा आत्मनः आवश्यकतानुसारमेव ग्रहदशां दानव्यवस्थां च निरूपयति स्म । यदि वर्षाकाले छत्रं नास्ति तर्हि कस्यापि कुण्डलीं दृष्ट्वा कथयति स्म "तव शनैश्चरः व्ययस्थाने वर्तते । अतः कृष्णवस्तूनां दानं कुरु यथा कृष्णंवस्त्रम् छत्रम् इत्यादि ।" एवमेव अन्यदपि । एवमेव भवद्भिरपि बुद्धि-कौशलेन देशकालानुसारं उपार्जनोपाया उद्भावनीयाः । पुनश्च कदाचित् आगन्तव्यम् ।

शिष्याः—यथा आदेशो गुरुवर्याणाम् ।

[सर्वे प्रणम्य गच्छन्ति]

———

१—सभारञ्जनशतकम् ।

६—यथा गुरुस्तथा शिष्यः

[एकः वृद्धः जटावांश्च गुरुः प्रविशति]

गुरुः—अहो, बहूनि दिनानि व्यतीतानि। मम भार्या केवलम् एकमासस्य कृते निजपितृगृहं गता। परं सा अद्यापि न आगतवती। अहं च अत्र एकाकी मक्षिका मारयन् दिनं रात्रिं च अतिवाहयामि। अन्यत् सुखं पृथक् तिष्ठतु, भोजनमपि मे यथासमयं दुर्लभं संवृत्तम्। तत् अद्यैव स्वशिष्यं मूर्खशेखरं श्वसुरालये प्रेषयामि पत्न्या आनयनाय। [उच्चैराह्वयति] अरे मूर्खशेखर!

मूर्ख०—एष आगच्छामि।

गुरुः—शीघ्रम् आगच्छ।

मूर्ख०—[धावन् आगत्य] एष उपस्थितोऽस्मि। आज्ञापयन्तु गुरुपादाः।

गुरुः—त्वं जानास्येव यथा मम पत्नी केवलम् एकमासस्य कृते निजपितृगृहं गता। परन्तु अद्य एकः वत्सरः व्यतीतः। तथापि सा न आगतवती। न च कश्चित् समाचारः प्राप्तः। अतः त्वम् अद्यैव मम श्वसुरालयं गच्छ शीघ्रं च मम पत्नीं सहैव आनयेति।

मूर्ख०—यथा आज्ञा। [गन्तुमिच्छति]

गुरुः—अन्यच्च शृणु तावत्। त्वया तत्र गत्वा चञ्चलता न प्रकटनीया, गंभीरतया स्थातव्यम्। यदि कश्चित् पंचवारं वदति तदा त्वया एकवारं वक्तव्यम्। भोजनं च बहु न कर्तव्यम्। अन्यच्च त्वया तत्र सर्वदा एकसमानं न वक्तव्यम् यदि पञ्च उच्चानि वाच्यानि तर्हि पञ्च-नीचानि वाच्यानि। अस्तु, गच्छ तावत्, शीघ्रं च पत्न्या सह आगन्तव्यम्।

मूर्ख०—यथा आदेशः श्रीगुरुचरणानाम् ।

[मूर्खशेखरः निष्क्रान्तः]

गुरुः—अद्य चिरात् शून्यतां गतं मदीयं गृहं नूपुर-झङ्कारेण पुनः झंकृतं भविष्यति । तद् गृहं गत्वा सम्प्रति स्वपत्न्याः स्वागतसत्काराय कञ्चित् प्रबन्धं करोमि । [किंचित् चलित्वा पुनः परावृत्य च] परन्तु न जाने अद्य केन कारणेन मदीयं वामनेत्रं स्फुरति । हृदये च पुनः पुनः कस्यचिद् अनिष्टस्य आशङ्का जायते । अस्तु, तावत् शकुनं कृत्वा मनसः शङ्कां दूरीकरोमि (अङ्गुलिगणनया शकुनक्रियां नाटयति) ।

(तावत् मूर्खशेखरः एकाकी आगच्छति) ॥

गुरुः—(सविस्मयं दृष्ट्वा) अरे मूर्खशेखर ! त्वम् एकाकी एव आगच्छसि ! मदीया गृहिणी कथं न आनीता ?

मूर्ख०—(विलापं कुर्वन्) गुरो ! किं ते अशुभं समाचारं श्रावयामि ?

गुरुः—अरे कथय कथय । कीदृशः स अशुभः समाचारः ! किं सा जीवति नहिं ?

मूर्ख०—गुरो ! जीवति कथं न । परं सा इदानीं विधवा संजाता । (पुनः रोदिति) ।

गुरुः—अरे मम प्रिया विधवा संजाता ? हा दैव ! (रोदिति)

(गुरुः शिष्यश्च उभौ अपि रुदतः)

(प्रतिवेशिनः समम्भ्रमं प्रविशन्ति)

एकः—अरे अरे किं जातम् ? कथम् उभौ अपि रुदतः ?

द्वितीयः—(गुरुं प्रति) कथय कथय, किं ते अनिष्टं संवृत्तम् ?

गुरुः—(विलपन्नेव) अरे किं कथयामि, अद्य मम बराकी पत्नी विधवा संजाता । (पुनः रोदिति)

एकः—अरे मूर्ख ! त्वयि जीवति कथं सा विधवा संजाता ?

द्वितीयः—महान् मूर्खः अस्ति ।

गुरुः—(प्रकुप्य) अहं किं जाने ? अयं मम शिष्यः अधुनैव तस्याः पितृगृहात् समाचारं गृहीत्वा आगतः अस्ति यत् सा विधवा संजाता इति ।

एकः—(हसन्) अरे मूढ़ ! पत्यौ जीवति स्त्री विधवा न भवति । मा रोदनं कुरु ।

गुरुः—स्त्रियम् अदृष्ट्वा मम विश्वासो न भवति ।

द्वितीयः—(उत्थापयन्) चल चल, उत्तिष्ठ, त्वयि जीवति तव स्त्री विधवा न भविष्यति ।

एकः—(शिष्यं प्रति) किं भोः त्वया कथं ज्ञातं यत् सा विधवा संजातेति ?

मूर्ख०—अहं न जाने । तत्रत्या एव जनाः कथयन्ति स्म ।

(सर्वे हसन्ति गुरुं शिष्यं च उत्थाप्य नयन्ति)

भरटकद्वात्रिंशिका

१०—कन्यापितृत्वं खलु नाम कष्टम्

(कन्यानां बाहुल्येन एकः चिन्ताकुलो युवकः प्रविशति)

युवकः—(सखेदम्)

पुत्रीति जाता महतीह चिन्ता,
कस्मै प्रदेयेति महान् वितर्कः ।
दत्ता सुखं प्राप्स्यति वा न वेति,
कन्यापितृत्वं खलु नाम कष्टम् ॥ १

विवाहानन्तरं मया चिन्तितं यत् प्रथमं मे पुत्रो भविष्यति । तं पाठयिष्यामि लेखयिष्यामि । ततश्च तस्य विवाहं करिष्यामि । विवाहे च पर्याप्त

१—पञ्चतन्त्रम्

द्रव्यं (तिलकदहेज) ग्रहीष्यामि । यथेच्छं च कन्यापितरं पीडयित्वा प्रभूतानि धनधान्यानि आहरिष्यामि । परन्तु—

यच्चिन्तितं तदिह दूरतरं प्रयाति
यन्नागतं मनसि मे तदिहाऽभ्युपैति ॥

इदानीं ततो विपरीतं पञ्च पञ्च कन्या मे समुत्पन्नाः । तत्तासां चिन्तया दिने रात्रौ वा क्वचिदपि शान्तिं न लभे । न जाने अग्रेऽपि कियत्यो भविष्यन्ति ?

(इतस्ततो भ्रमित्वा)

तिलकदहेजस्य च प्रथा सम्प्रति सीमानम् अतिक्रान्ता वर्तते । कोऽपि श्यशुरः पञ्चसहस्रेभ्यः न्यूनं न याचते ! घुरहू कतवारू अपि ततो न्यूनस्य वार्तां न कुरुतः । वरयात्रयाश्च स्वागतसत्कारस्य महान् भारः पृथगेव वर्तते । वरयात्रायाः सर्वे जनाः लाटस्य एव पुत्रा भवन्ति । कश्चित् तर्जयति, कश्चित् भर्त्सयति, कश्चित् कुपितो भवति, कश्चित् भोजनमेव न कुरुते ? कश्चित् मध्ये एव पलायनस्य भयं दर्शयति ! किमधिकम्, सर्वस्वदानेनापि यशो दुर्लभं भवति । सर्वं कृत्वा च यदि अन्ते गमन-काले सर्वेषां कृते मार्गे भोजनाय चिपुटादिकं न दीयते तदा सर्वमपि कुट्टितं पिशितं च निरर्थकं भवति । सर्वेऽपि गालिं ददाना गच्छन्ति । धिक् श्वथुरम्, जलपानमपि सम्यक् न दत्तवान् ।

न च अत्रैव संकटस्य समाप्तिर्भवति । वरस्य दुराग्रहः एकम् अन्य-देव महासङ्कटम् उत्पादयति । वराः चिरबुभुक्षिता इव समायान्ति । तेषां लोभस्य याचनायाश्च अन्त एव न लगति । पदे पदे द्रव्यं याचन्ते, पदे पदे आग्रहं कुर्वन्ति, पदे पदे कुपिता भवन्ति । इदं देयम् इदं देयम् इदं देयम् इति तेषां याचनस्य समाप्तिरेव न भवति ।

तत्र ये शिक्षिता वरा भवन्ति ते तु मूर्खेभ्योऽपि भयङ्करा भवन्ति। तेषु कश्चित् घटीं याचते, कश्चित् सायकिल याचते, कश्चित् स्कूटरं याचते। कश्चित् ट्रान्जिस्टरं याचते। न जाने किं किं याचन्ते ? इदं च सर्वं ते साधारणं न इच्छन्ति। अपि तु सर्वश्रेष्ठम्। वेस्ट एण्ड वाच घड़ी इच्छन्ति, रेले साइकिल इच्छन्ति, इच्छन्ति। इय दशा अस्ति शिक्षितानां वराणाम्। तदा मूर्खाणां का कथा। इयं समाजस्य परिस्थितिः अस्ति। अतएव कथयामि—

पुत्रीति जाता महतीह चिन्ता
कस्मै प्रदेयेति महान् वितर्कः।
दत्ता सुखं प्राप्स्यति वा न वेति
कन्यापितृत्वं खलु नाम कष्टम्॥

(निष्क्रान्तः)

११—विधातुर्मूढता

(रूपेण, वेषभूषया, चेष्टादिभिः, वाण्या च हास्यजनकः एकः पुरुषः आगच्छति वक्तुं च प्रारभते)

आः, मूढताऽपि एका महती प्रबला पिशाचिनी अस्ति। अखिलेऽपि ब्रह्माण्डे एकोऽपि ईदृशः प्राणी न मिलिष्यति यः अनया पिशाचिन्या परिगृहीतो न भवेत्। अन्येषां पामराणां का कथा ! ब्रह्माऽपि अनया राक्षस्या मुक्तः नास्ति।

ब्रह्मा देवानां मध्ये श्रेष्ठदेवः मन्यते ! चत्वारि मुखानि सन्ति। चतुर्भ्यो मुखेभ्यः चतुर्णां वेदानामुपदेशं करोति ! विष्णोः नाभिकमले तिष्ठति ! नीरक्षीरविवेकी हंसः तस्य वाहनं वर्तते। एतावती प्रतिष्ठा !

(हसित्वा) परं तस्यापि मूढताया इयत्ता नास्ति। महान् अविवेकी, महान् मूढः, महान् उच्छृङ्खलश्च।

विचारयन्तु भवन्तः। मृगा वनेषु निवसन्ति, तृणानि च चरन्ति। न कस्यापि हानिं कुर्वन्ति न कस्यापि हिंसां कुर्वन्ति। अतीव भीरवः कोमलस्वभावाश्च भवन्ति। दर्शनमात्रेण चित्तं प्रसन्न भवति। परन्तु तेषां नाभिमध्ये ब्रह्मा कस्तूरीं कृतवान्। अहह! तेन वराका मृगा निरपराधं हन्यन्ते। पश्यन्तु, कीदृशं अविवेकपूर्णं कार्यमिदं वर्तते। इयं कस्तूरी यदि चाटुकाराणां, मिथ्यावादिनां च जिह्वाया मूले निक्षिप्ता स्यात् तर्हि संसारस्य कियान् उपकारः सम्पद्येत! जिह्वायाश्छेदेन तेषां सकलोऽपि उपद्रव एव समाप्तिं गच्छेत्।

अथ द्वितीयां मूढतां पश्यन्तु। मनुष्याणां जीवने तैलस्य महान् उपयोगो वर्तते। आहारे, अङ्गसम्मर्दने, शिरोवेदनायां, दीपप्रज्वालने च तैलस्य सर्वेषां गृहे उपयोगो भवति। दरिद्राणां तु सर्वाणि पक्वान्नानि अपि तैलेनैव निर्मितानि भवन्ति। एवं प्रकारेण धनिकानां दरिद्राणां वा कृते तैलं एकं अतीव आवश्यकं वस्तु वर्तते। परन्तु तैलस्य कृते ब्रह्मणा स्थानं किं प्रदत्तं! तिलानि सर्षपाश्च! येन सहस्रेणापि तिलानां प्रसृतिमात्रमपि तैलं न निस्सरति? इदं तैलं यदि कूष्माण्डेषु निक्षिप्तं भवेत् तर्हि एकेन कूष्माण्डेन एकपञ्चसेरी-परिमितं तैलं निस्सरेत्। तेन कियान् लाभः स्यात् जनतायाः। परं विधातुर्मूढतायाः किम् औषधम्!

तृतीयां मूढतां पश्यन्तु। विच्छादने आच्छादने च कम्बलानि अतीव उपयोगीनि भवन्ति। शीतकाले तु कम्बलानि सर्वथा अपरिहार्याणि भवन्ति। इमानि कम्बलानि ऊर्णाभिः निर्मीयन्ते परं तानि ऊर्णानि महापंडितेन ब्रह्मणा कुत्र निर्मितानि? मेषेषु! लघुतमेषु जन्तुषु। किं मेषेभ्यः अधिका विशाला जन्तवः न सन्ति? गावो न सन्ति, महिष्यो न सन्ति? इयं ऊर्णा यदि

विशालकायेषु गजेषु निक्षिप्ता भवेत् तर्हि केवलं एकेन शुण्डादण्डेन पर्याप्ता ऊर्णा उत्पद्येत। परं विधातुस्तत्र दृष्टिरेव न गता ? यद्यपि तस्य अष्टौ नेत्राणि वर्तन्ते ?

यदि ब्रह्मणः एतादृशी दशा तर्हि अन्ये यदि राजनीतिज्ञाः, शासकाः नेतारः अधिकारिणो, विद्वांसश्च मूर्खतां कुर्वन्ति तदा किमाश्चर्यम् ?

(निष्क्रान्तः)

१२—दरिद्रस्य दुरवस्था

(एकः दरिद्रजनोचित-वेषभूषादि-समन्वितः पुरुषः स्कन्धे एकं अतीव जीर्णं मलिनं च उत्तरीयं धारयन् प्रविशति)

दरिद्रः—अहो दारिद्र्यवशात् नितान्तमेव इदानीं दयनीया मे परिस्थितिः सञ्जता वर्तते। एकं समीचीनं वस्त्रमपि मे सम्प्रति दुर्लभं संवृत्तम्। पश्यन्तु नाम—(उत्तरीयं दर्शयति)

अयं पटो मे पितुरंगभूषणं
पितामहाद्यैरुपभुक्तयौवनः ।
अलङ्करिष्यत्यथ पुत्रपौत्रकान्
मयाऽधुना पुष्पवदेव धार्यते ॥ १

सर्वापेक्षया क्लेशकरं तु इदं वर्तते यत् निर्धने जने गुणो भवतु दोषो वा, कथमपि तस्य सम्मानो न भवति। दोषास्तु दोषा एव। तस्य गुणा अपि दोषा एव मन्यन्ते। तथाहि—

निर्धनो यदि उच्चः तदा स्तम्भः। यदि खर्वः तदा वामनः। यदि गौरः तदा आमवाती। यदि कृष्णः तदा वनेचरो भिल्लः।

१—मृच्छकटिकम्।

यदि अल्पाहारी तदा मन्दः। यदि बह्वाहारः तदा क्षारकृत् शनैश्चरो लग्नः। यदि आडम्बरी तदा विटः। यदि विनयो तदा भिक्षाचरो याचकः। यदि मितभाषी तथा मूको मूर्खश्च। यदि वाग्मी तदा बातुलो बहुभाषी भषकः प्रलापी च। यदि क्षमी तदा भीरुः रङ्कश्च। यदि खरः तदा घाटीवाहकः। किं बहुना, निर्धनः कुत्रापि न पूजनीयः।१

न चेयं बहिःप्रदेशस्य कथा अस्ति। यथा बहिः तथा गृहेऽपि तस्य समादरो न भवति।

माता निन्दति, नाभिनन्दति पिता, भ्राता न सम्भाषते,
भृत्यः कुप्यति, नानुगच्छति सुतः, कान्ता च नाऽलिंगते।
अर्थप्रार्थनशङ्कया न कुरुते सम्भाषणं वै सुहृत्।

अतएव कथितं केनापि—

तस्माद्द्रव्यमुपार्जयस्व सुमते! द्रव्येण सर्व वशाः।।२

आम्, एकस्तु लाभः अयं अस्ति यद् दरिद्राणां सन्ततयः अधिका भवन्ति। अन्येषां का वार्ता? ममैव पंच बालकाः षट् च बालिकाः सन्ति। अग्रे न जाने कियन्तो भविष्यन्ति। एषु कश्चित् भोजनं याचते, कश्चित् वस्त्रं याचते। परं किं ददामि? कुतश्च आनयामि?

अनेनैव हेतुना गृहिण्या आदिष्टोऽस्मि क्वचित् परदेशे गत्वा उपार्जनं कर्तुम्। तद् गम्यते तावत्। किमत्राऽवस्थानेन, कृपणानां पुरस्तात् दुःखगानेन च। स देशो यत्र जीव्यते।

(निष्क्रान्तः)

१—उपदेशमंजरी। २—सुभाषितरत्नभाण्डागारः।

१३--अभिनवानि षट् शास्त्राणि

(अध्ययनकक्षे कतिपय-पुस्तक-पत्र-लेखनी-मसीपात्रादिभिः सह एको जनः लेखनपरायणस्तिष्ठति)

लेखकः—(आयान्तं सुहृदं दृष्ट्वा) अहो आगम्यताम् आगम्यताम्, अलङ्क्रियतामासनमिदम्। अपि कुशलं वर्तते ?

सुहृद्—आम्, सर्वं कुशलं वर्तते। (साश्चर्यम्) इदानीं भवान् निरन्तरं लेखनव्यापारे एव निरतस्तिष्ठति। मन्ये, अनेकानि पुस्तकानि लिखितानि भवता ?

लेखकः—ओम्, अनेकानि लिखितानि कानिचित् लिख्यन्ते च। यतो हि—

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
कर्तव्या बहवो ग्रन्था यद्येकोऽपि प्रथां व्रजेत्॥ १

सुहृद्—अथ इदानीं कानि पुस्तकानि लिख्यन्ते ?

लेखकः—इदानीं तु मया अभिनवानि षट् शास्त्राणि लिख्यन्ते।

सुहृद्—(साश्चर्यम्) अभिनवानि षट् शास्त्राणि ? किं प्राचीन-शास्त्रेभ्यः एतेषु काचिद् विशेषता वर्तते ?

लेखकः—आम्, बह्वी विशेषता वर्तते। प्राचीनानि शास्त्राणि प्रायेण परलोकप्रधानानि वादविवादपर्यवसायीनि च। अतएव ऐहिक-लोकजीवनाय नितान्तमनुपयोगीनि वर्तन्ते। परन्तु इमानि मम अभिन-वानि षट् शास्त्राणि तु वर्तमानयुगे नितान्तं लोकहितसाधकानि भविष्यन्ति।

सुहृद्—तर्हि सुमहान् लोकस्योपकारः सम्पत्स्यते इति सम्भाव-यामि। अथ कानि भवतामभिनवानि षट् शास्त्राणि ? उत्कण्ठितं ते मनस्तेषां परिज्ञानाय।

१—डमरुकम्।

लेखकः—यद्येवमुत्कण्ठा तर्हि श्रूयताम्। तेषां नामानि सन्ति—उत्कोचकलानिधिः, चौर्यचिन्तामणिः, मिथ्याभाषणसंहिता, स्वाच्छन्द्यलहरी, प्रवञ्चनापारमिता, व्यभिचारविलासश्चेति। खण्डभेदेन अधिकरणभेदेन अध्यायभेदेन परिशिष्टभागेन च सुमहान् एष ग्रन्थराशिः अचिरेणैव कालेन लोकानां दृष्टिगोचरतां यास्यति।

सुहृद्—(सविस्मयम्) आः महान् खलु एष पुरुषार्थः लोकोपकारश्च। तदेतेषां संक्षेपतः परिचयमपि प्राप्तुमिच्छामि। यदि भवतां कष्टं समयातिपातश्च न भवेत्।

लेखकः—आः किं नाम कष्टम्? श्रूयतां यदि श्रोतुमिच्छाऽस्ति। उत्कोचकलानिधौ तावत् पञ्च विभागाः सन्ति—१ न्यायालयविभागः, २ पुलिसविभागः, ३ पञ्चायतविभागः, ४ लेखपालविभागः, तथा ५ रेलवेभर्तीविभागः। एषु न्यायालयविभागे पञ्च प्रकरणानि सन्ति—१-हाकिमप्रकरणम् २-पेशकारप्रकरणम् ३-अलहमदप्रकरणम् २-मुंशीप्रकरणम् तथा चपरासीप्रकरणं च। एवमेव अन्यविभागेषु अपि।

चौर्यचिन्तामणौ खण्डद्वयं वर्तते। रात्रिचौर्यखंडः दिनचौर्यखंडश्च। तत्र रात्रिचौर्यखण्डे लुण्ठक-चौरादि-प्रकरणानि सन्ति। दिनचौर्यखण्डे तावत् अधिकारिप्रकरणम् वाणिज्यप्रकरणम्, ठीकेदारीप्रकरणम्, डाक्टरीप्रकरणम्, राशनिंगप्रकरणं तथा चन्दाप्रकरणं चेति अष्टौ प्रकरणानि सन्ति।

मिथ्याभाषणसंहितायाम् अनेके अध्यायाः सन्ति। तद् यथा—१-लेक्चराध्यायः, प्रचाराध्यायः, विज्ञापनाध्यायः, अभियोगाध्यायः तथा विरोधीपार्टीनिन्दाध्यायश्चेति।

स्वाच्छन्द्यलहरीग्रन्थे आफिसरविभागः, सर्वेन्टविभागः, स्टूडेन्टविभागश्चेति त्रयः प्रधानखण्डाः सन्ति।

प्रवञ्चनापारमितायां धर्मखण्डः राजनीतिखण्डः व्यापारखण्डश्चेति त्रयः खण्डा वर्तन्ते। तेषु धर्मखण्डे पण्डाप्रकरणम्, पुजारीप्रकरणम्,

पुरोहितप्रकरणम्, गुरुप्रकरणम्, ज्यौतिषिप्रकरणम्, सोखाप्रकरणम्, साधुसन्तप्रकरणञ्चेति अनेकानि प्रकरणानि सन्ति। एवमेव अन्यखण्डयोरपि बहूनि प्रकरणानि सन्ति।

व्यभिचारविलासे पञ्च अधिकरणानि सन्ति। यथा—नृत्यगीताधिकरणम्, सिनेमाधिकरणम् मठमन्दिराधिकरणम्, सोखाड़-अधिकरणम् तथा कीर्तनाधिकरणञ्चेति। अयं संक्षिप्तः परिचयः अस्ति। प्रकाशने जाते भवन्तः विशेषरूपेण सर्वं स्वयमेव ज्ञास्यन्ति।

सुहृद्—तर्हि अस्य साहित्यस्य प्रकाशनेऽपि महान् व्ययो भविष्यति।

लेखकः—आम्, भविष्यति, परं राजकीय-भ्रष्टाचारविभागतः एतदर्थं विपुलं साहाय्यं मिलिष्यति। प्रकाशनस्य काचित् चिन्ता नास्ति।

सुहृद्—अस्तु, मया महान् विघ्नः कृतः। क्षम्यताम्। तावद् गच्छामि अहम्।

लेखकः—अहमपि कार्यान्तरं सम्पादयितुं गच्छाम्येव।

(उभौ प्रणम्य निष्क्रान्तौ)

१४—वृद्धो नरः कष्टशतानि भुङ्क्ते

(दंडं गृहीत्वा मन्दं-मन्दं चलतः कम्पमानस्य च एकस्य वृद्धजनस्य प्रवेशः)

वृद्धः—आः वृद्धत्वं नाम सुमहद् विपत्तिस्थानं स्त्रीपुरुषाणाम्। किं किं दुखं वर्णयामि?

गात्रं संकुचितं, गतिर्विगलिता, भ्रष्टा च दन्तावलिः,
दृष्टिर्नश्यति, वर्धते वधिरता, वक्त्रं च लालायते।
वाक्यं नाद्रियते च बान्धवजनैर् भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥१॥

१—सुभाषितरत्नभाण्डागारः।

यावद् वित्तोपार्जनशक्तस्तावत् निजपरिवारो रक्तः।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ॥ १

(निष्क्रामति)

१५—नूतनं धर्मशास्त्रम्

जिज्ञासुः—महाराज ! ओल्ड फैशन के लोगों द्वारा लिखी गई 'मनु-स्मृति' आदि जंगली ला की किताबों से हम अपटूडेट फैशन के लोग बेतरह तंग आ गए हैं, क्योंकि उन पुस्तकों की बातें हम लोगों को कभी भी सूट नहीं करती ! अतः हम लोगों के लिए यदि जमाने के मुताबिक धर्म का उपदेश करें, तो हम लोगों को बड़ी फैसलिटी हो जाय।

आचार्य अपटुडेटभट्ट—भाई, यह तो आज के हर जेन्टिलमैन की वान्ट है और निहायत जरूरी है। बैठिए, आज हम आप लोगों को "टुडे स्मृति" से कुछ बिलकुल अपटूडेट बातें बता रहे हैं। सावधान होकर सुनें !

जिज्ञासु—हाँ महाराज ! हम लोग यही चाहते हैं।

भट्टः—एकदा चेयरासीनं टुडेधर्मविदां वरम्।
महर्षिं फैशनाचार्यं जैण्टिलमैनाः समाययुः ॥
सम्यग् हुतसिगारास्ते सबूटा हैटपाणयः।
गुड मार्निङ्ग इति प्रोच्य स्थित्वा पप्रच्छुरादरात् ॥

भवान् टुडेधर्मविदां वरिष्ठो न्यूफैशनागाध-समुद्रमन्थः।
रिफार्मराणां धुरि कीर्तनीयो नो ब्रूहि सर्वं कलिधर्मतत्त्वम् ॥

फैशनाचार्य उवाच—

जलेषु हर्कतो जज्ञे मत्स्या हर्कतसम्भवाः।
त एव जाता मण्डूका अथ ते पक्षिणोऽभवन् ॥

१—चर्पटपञ्जरिका।

पक्षिभ्यः पशवो जातास्तेऽपि वानरतां गताः ।
घृष्टपुच्छा वानरास्ते नरा लोकेऽस्मदादयः ॥
लेडी फ्रेण्डस्-समाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्रोक्तं टुडेधर्मस्य लक्षणम् ॥
मन्थली वीकली डेली पत्रैर्यूरोपनिःसृतैः ।
यत्किञ्चिल्लिख्यते तद्वै स्वतः प्रामाण्यमर्हति ॥
वेदशास्त्रपुराणेषु ओल्ड फैशन मानवैः ।
यदुक्तं तन्न संसेव्यं टुडेधर्मविरोधि तत् ॥

दिनचर्या

प्रातरुत्थाय मञ्चस्थो लालाक्लिन्नमुखः पुमान् ।
टी काफी विस्कुटं केकं सेवयेन्नित्यमेव हि ॥
बूटे सलीपरे शूजे पैम्पे चपकने तथा ।
फुलस्लीपर युग्मे च नित्यं कुर्वीत पालिशम् ॥
सेफ्टीरेजरयन्त्रेण श्मश्रु कृन्तेत् सकूर्चकम् ।
नासारंध्रप्रदेशे वा रक्षयन् मक्षिकासमम् ॥
साप्ताहिकं शीतकाले ग्रीष्मकाले यथारुचि ।
मग्नः टीन-टवें कुर्यात् स्नानं सोपसमन्वितम् ॥
टेबिलं पुरतो धृत्वा चेयरस्थतनुः पुमान् ।
सूटेडो बूटेडो भुंज्यात् छुरिकाकण्टकान्वितः ॥
न शिखां धारयेत् प्राज्ञः "टेनिसे" हास्यकारिणीम् ।
न सूत्रं विभृयात् स्नाने "सोप" मर्दनरोधकम् ॥
"पपी पपी" समुच्चार्य प्रेम्णा सीटीसमन्वितः ।
करेण चुटकीं दत्वा रक्षेत् कुक्कुर-शावकम् ॥
न वदेद् भारतीं भाषां अंग्रेजीं सततं वदेत् ।
हस्तिना ताड्यमानोऽपि न गच्छेद् देवमन्दिरम् ॥

BVBSSMV

संक्षेप में यही सब टुड़ेस्मृति में प्रतिपादित धर्म हैं। यदि आप लोग इनके अनुसार चलें, तो देश फौरन् से पेश्तर ही प्रोग्रेसकी आखिरी मंजिल पर पहुँच जायगा। जाइए, तबतक इसका पालन और प्रचार कीजिए। (अभिनेता को इन श्लोकों का अर्थ भी सुनाना चाहिये)

जिज्ञासु—बहुत अच्छा, गुड मार्निङ्ग।

(महामहोपदेशक-श्रीमाधवाचार्यकृता "टुडे स्मृतिः")

———

१६—श्वसुरालये गमनम्

जामाता—(शुभ्रवेषभूषादि-सुसज्जितः)

बहूनि दिनानि व्यतीतानि, अहं श्वसुरालयं न गतवान्। इदानीं च द्रव्याभावात् गृहे स्वादिष्टं भोजनं न मिलति। प्रतिदिनं नीरसेन भोजनेन आकुलीभूतं मनः। तत् साम्प्रतं श्वसुरालयं गत्वा कानिचित् दिनानि भोजनसुखमनुभवामि।

(दर्पणे मुखं निरीक्ष्य कङ्कतिकया च केशान् प्रसाध्य चलति।)

एकं मित्रम्—सखे, कुत्र सुसज्जितो भूत्वा गच्छसि।

जामाता—मित्र, श्वसुरालयं गच्छामि।

मित्रम्—श्वसुरालये तव महान् स्नेहः?

जामाता-अरे, ममैव कथम्? देवानामपि श्वसुरालये महान् स्नेहः।

असारे खलु संसारे सारः श्वसुरमन्दिरम्।
हरो हिमालये शेते हरिः शेते महोदधौ॥ १

अन्यच्च न जानासि? यथा मनुष्याणां पञ्च प्राणाः शरीरे तिष्ठन्ति तथैव पञ्च प्राणाः बहिरपि तिष्ठन्ति।

१—सुभाषितरत्नभाण्डागार।

783

मित्रम्—सखे ! ते के सन्ति ?

श्रूयताम्—

गृहिणी, भगिनी तस्याः, श्वसुरौ, श्याल इत्यपि ।
प्रांगणः कलिना सृष्टाः पञ्च प्राणा इमेऽपरे ॥ १

अन्यच्च मम श्वसुरालये एका अन्यापि महती सुविधा वर्तते ।

मित्रम्—सा सुविधा का ?

जामाता—श्रूयताम् । मम श्वसुरः इदानीं परदेशं गतोऽस्ति । ये श्यालाः सन्ति तेऽपि बालका एव सन्ति । उचितम् अनुचितं वा किमपि न जानन्ति । श्यालीषु मम गृहिणी एव ज्येष्ठा वर्तते । याऽपि श्वश्रूः वर्तते सापि वृद्धा अस्ति । विशेषतश्च मम वशवर्तिनी, तेन अहं श्वसुरालये यथेच्छं विहरामि । गृहेऽपि किञ्चित् आनयामि । कापि बाधा नास्ति ।

मित्रम्—तर्हि एष तव महान् भाग्योदयकालः ।

जामाता—अथ किम् ! भाग्येनैव ईदृशो योगो मिलति । यतोहि ज्यौतिषशास्त्रे लिखितं वर्तते—

भार्या ज्येष्ठा, शिशुः श्यालः, श्वश्रूः स्वातन्त्र्यवर्तिनी ।
श्वसुरस्तु प्रवासी च जामातुर्भाग्यकारकम् ॥ १

मित्रम्—अहो महान् भाग्यवान् असि । गच्छ यथेच्छं विहर । परं ममापि एकं उपदेशं मा विस्मरे :—

जामाता—कोऽसौ उपदेशः !

मित्रम्—अयमेव यत् श्वसुरालये स्वादिष्टभोजनलोभेन बहुदिनानि न स्थातव्यम् । यतः—

श्वसुरपुरनिवासः स्वर्गतुल्यो नराणां,
यदि भवति विवेकी पञ्च षड् वा दिनानि ।
दधि-घृत-मधु-लोभात् मासमेकं वसेच्चेत्,
भवति विगतलज्जो मानवो मानहीनः ॥ २

१—शमारञ्जनशतकम् ।

जामाता—आः तव उपदेशः तुभ्यमेव तिष्ठतु । मम तु भोजनं प्रधानं वर्तते । 'बुभुक्षितं न प्रतिभाति किञ्चित्' ।

———

भैरवाचार्यः

(हस्ते नरकपालमादाय स्कन्धे च विविध-तान्त्रिक-वस्तूनां ग्रन्थिद्वयं वहतः "औघड़" रूपे एकस्य वाममार्गीय—साधोः भैरवानन्दस्य प्रवेशः)

भैरवानन्दः—(स्वगतम्) अहह ! कीदृशं खलु अनन्यजन-साधारणं सौभाग्यमस्माकम् ! यथा अस्माकं वाममार्गे परिश्रमं विना सर्वाण्यपि आनन्दोपभोगसाधनानि सुलभानि वर्तन्ते न तथा कस्मिन्नपि अन्यस्मिन् सम्प्रदाये । अन्येषु सम्प्रदायेषु अनेके विधिनिषेधाः पालनीया भवन्ति, परं वाममार्गे तु न किञ्चित् अपेयं वर्तते, न किञ्चित् अखाद्यं वर्तते, न किञ्चित् अकार्यं वर्तते, न च किञ्चित् अनुपभोग्यं वर्तते । अस्माकं स्वच्छन्दतायाः जगतीतले काचित् तुलना नास्ति ।

मन्त्रो न तन्त्रं न च किमपि ध्यानं,
ज्ञानं च नो किमपि गुरुप्रसादात् ।
मद्यं पिबामो महिलां रमयामो,
मोक्षं च यामः कुलमार्गलग्नाः ॥ १

अपि च

रण्डा चण्डा दीक्षिता धर्मदारा,
मद्यं मांसं पीयते खाद्यते च ।
भिक्षा भोज्यं चर्मखण्डं च शय्या,
कौलो धर्मः कस्य नो भाति रम्यः ॥ २

१—२—कर्पूरमञ्जरी ।

न केवलं ऐहिकानि सुखसाधनान्येव, परं मोक्षलाभोऽपि अस्माकं सुगमतयैव सम्पद्यते। न काचित् ज्ञानस्य आवश्यकता न वा काचित् अनुष्ठानस्य !

मुक्तिं भणन्ति हरिब्रह्ममुखादिदेवा
ज्ञानेन वेदपठनेन क्रतुक्रियाभिः।
एकेन केवलमुमादयितेन दृष्टो
मोक्षः समं सुरतकेलि-सुरारसैश्च ॥ १

अथ च यथा अस्माकं न किञ्चित् अपेयं वर्तते, न किञ्चित् अखाद्यं वर्तते तथैव किञ्चित् असाध्यमपि नास्ति। वयं असम्भवमपि सम्भवं कृत्वा दर्शयामः।

दर्शयामि तमपि शशिनं वसुधावतीर्णं
स्तम्भ्नामि तस्यापि रवे रथं नभोऽर्धे।
आनयामि यक्षसुरसिद्धगणाङ्गना-
स्तन्नास्ति भूमिवलये यन्न साध्यम् ॥ २

(स्मृतिमभिनीय)

अहो विस्मृतं मया, आदिष्टोऽस्मि गुरुणा महाभैरवाचार्येण श्मशानं गत्वा कानिचित् अभिनवानि कपालानि आनेतुम्। दूरे च श्मशान-भूमिः। तत् शीघ्रमेव गच्छामि।

(निष्क्रान्तः)

———

१-२-कर्पूरमञ्जरी।

१८—भज गोविन्दम्

(साधुवेषे हरिनाम उच्चारयन् एकः जनः प्रविशति)

साधुः—(प्रसन्नतां नाटयन्) भज गोविन्दम् भज गोविन्दम् । श्रीकृष्ण गोविन्द हरे मुरारे । जय जगदीश जय जगदीश जय० । नारायण नारायण नारायण । आः महान् आनन्दः अस्ति अस्मिन् आश्रमे । न गृहस्य चिन्ता न परिवारस्य चिन्ता । न कश्चित् क्लेशो न वा कश्चित् परिश्रमः । अनायासेन सदा सुखमनुभूयते । अतएव आचार्यैः कथितम्—

विनैव कष्टेन विना परिश्रमं
विना कुटुम्बोचित-भारचिन्तनम् ।
समस्त-सौख्यानि समाप्नुवन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ १

इदानीं ममापि महत् सुखं वर्तते । सर्वाधिकं सौख्यं तु इदं वर्तते यत् निश्चिन्तो जीवनं यापयामि यथेच्छं च विचरामि ।

प्रपायां पीयते वारि सत्रागारेषु भुज्यते ।
उष्यते परगेहेषु लभ्यते तत्र.....॥

नारायण नारायण । श्रीकृष्ण गोविन्द हरे मुरारे !

अस्तु तावत् मालां गृहीत्वा जपं करोमि । यतो हि—

सदा जपपटो हस्ते मध्ये मध्येऽक्षिमीलनम् ।
सर्वं ब्रह्मेतिवादश्च सद्यः प्रत्ययहेतवः ॥ २

(जपति, मध्ये मध्ये अक्षिणी निमीलयति, "ब्रह्म सत्यं जगन्मिथ्या, सर्वं ब्रह्ममयं जगत्" इत्यादि वाक्यानि वदति पुनश्च ध्यानमग्नो भवति)

अहह किं करोमि !

१—सम्पादकः । २—सभारञ्जनशतकम् ।

उपनिषदः परिपीता गीताऽपि च हन्त श्रुतिपथं नीता ।
तदपि न हा विधुवदना मानसदनाद् बहिर्याति ॥ १

बहोः कालात् ईदृशः कश्चित् मूर्खो यजमानोऽपि न मिलितो यस्य गृहे स्थित्वा मनोरथं पूरयामि ।

शिष्यः—(सहसा प्रविश्य) नमो नमश्चरणकमलेभ्यः ।

साधुः—अहो आगतस्त्वम् ? कथय-कथय, किं किं कार्यं साधितम् ?

शिष्यः—(परितोऽवलोक्य) महाराज ! इदानीं चिन्तायाः प्रयोजनं नास्ति । एकस्यां मूर्खवसतौ अहं गतवान् । तत्र मया धूर्तताया ईदृशो महान् जालः प्रक्षिप्तो यत्र सर्वेऽपि नरा नार्यश्च अनायासेनैव पतिताः सन्ति । तद् भवता शीघ्रमेव तत्र गन्तव्यम् । परन्तुः यः लाभो भविष्यति तत्र ममापि अर्धम् अर्धम् भविष्यति ।

साधुः—बाढम्, तवापि भविष्यति ।

(नारायण नारायण इति कुर्वन्तौ उभौ अपि निष्क्रान्तौ)

१६—समस्यापूर्तिः

(महाराजो विदूषकश्च राजसभायां विराजेते)

प्रतीहारी—(प्रविश्य) महाराज ! केचन महाकवयो देवस्य दर्शनं प्रतीक्षमाणा वर्तन्ते ।

विदूषकः—(विहस्य) दृश्यताम्, यन्मया कथितं तदेव सत्यं जातम् ।

सिद्धं ह्येतद् वाचि बीयं द्विजानाम् ।

राजा—प्रवेश्यताम् । कवीनां प्रवेशे को विचारः ?

१—सुभाषितरत्नाकरः ।

(प्रतिहारी गत्वा कवीन् प्रवेशयति)

कवयः—विजयतां महाराजः ।

राजा—(ससम्भ्रमम्) आगम्यताम् आगम्यताम् । अलङ्क्रियन्तामिमानि आसनानि । अथ तत्रभवतां परिचयः ?

एकः कविः—महाराज ! वयं सर्वेऽपि समस्यापूर्तौ विख्यातकीर्तयः कवयः स्म ।

विदूषकः—(स्वगतम्) स्वगृहे महाकवयो भविष्यन्ति । 'मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी' ।

द्वितीयः कविः—कठिनातिकठिनाऽपि समस्या अस्माभिः क्षणमात्रेण पूर्यते । तद् भवादृशा एव गुणग्राहिणः अस्मादृशां महाकवीनां प्रतिभायाः प्रदर्शनस्थानमिति वयं समागताः ।

विदूषकः—महाराज ! एतेषां महाकवित्वे अस्माकं विश्वासः नास्ति । यतो हि—

कविरमरः कविरचलः कविरभिनन्दश्च कालिदासश्च ।
अन्ये कवयः कपयश्चापलमात्रं परं दधते ॥

तृतीयः कविः—महाराज ! ननु प्रत्यक्षे विश्वासस्य किं प्रयोजनम् ?

राजा—(विदूषकं प्रति) अथ किम् । समस्या दीयताम् । तत्कालं च पूर्तिः श्रूयताम् । अत्र विश्वासस्य कः प्रश्नः !

विदूषकः—बाढम्, तर्हि प्रदर्श्यतां स्वकीयं महाकवित्वम् । दीयते मया समस्या ।

कविः—बाढं बाढम्, यथेच्छं दीयताम् ।

विदूषकः—(प्रथमं प्रति) पूर्य्यतां तावदियं समस्या ।

"गु लु गगु लु गु लु गगु लू"

प्रथमः कविः—आम् पूरयामि, श्रूयताम् एतत्—

जम्बूफलानि पक्वानि पतन्ति विमले जले ।
कपि-कम्पितशाखाभ्यो गुलुग्गुलुगुलुग्गुलू ॥१

विदूषकः—(द्वितीयं प्रति) भवान् तावदिमां समस्यां पूरयतु ! भवतो योग्यतां पश्यामि । समस्या अस्ति—

"ठ ठं ठ ठं ठं ठ ठ ठं ठ ठं ठ म्"

द्वितीयः कविः—अत्र योग्यतायाः कः प्रश्नः, उपस्थितमेव इदम्—

रामाभिषेके मदविह्वलाया
हस्ताच्च्युतो हेमघटस्तरुण्याः ॥
सोपानमासाद्य चकार शब्दं
ठ ठं ठ ठं ठं ठ ठ ठं ठ ठं ठ म् ॥ २

विदूषकः—(तृतीयं प्रति) इदानीं भवतः अवसरो वर्तते ! सावधानो भवतु । भवतः समस्या अस्ति—

"यज्ञोपवीतं परमं पवित्रम्" ।

तृतीयः कविः—अत्र सावधानतायाः का आवश्यकता ? सत्वरमेव पूरयामि—

अणोरणीयान् महतो महीयान्
मध्यो नितम्बश्च सुमध्यमायाः ।
तद्गात्र-सङ्गात् स्खलितं मदीयं
यज्ञोपवीतं परमं पवित्रम् ॥ (सर्वे हसन्ति)

राजा—(विदूषकं प्रति) अद्यापि विश्वासो जातो न वा ?

विदूषकः—विकटाः समस्यास्तु अवशिष्टा एव सन्ति । यदि इमां समस्यां कश्चित् पूरयेत् तदा अहं महाकविं जानीयाम् । समस्या अस्ति—

"हूं हु हूं हु हु हु हूं हु हू हूं हूं"

१—सुभाषितरत्नभाण्डागारम् । २—भोजप्रबन्धम् ।

चतुर्थः कवि—अत्र को विचारः ? श्रूयताम् । अहं पूरयामि—

उन्नमय्य सकलग्रहमास्यं
चुम्बति प्रियतमे हठवृत्या ।
कूजितं जयति मानधनाया
हूं हु हूं हु हु हु हूं हु हु हूं हूं ॥ (सर्वे हसन्ति)

विदूषकः—अथ यदि इयं पञ्चमी समस्या पूर्यते तर्हि अहं सर्वेषां महाकवित्वं स्वीकरोमि । समस्या वर्तते—

"सिन्दूरबिन्दुर्विधवाललाटे"

(सर्वे विस्मयं नाटयन्ति)

पञ्चमः कविः—अत्र किं काठिन्यं वर्तते ? श्रूयताम्—

रे पुत्र सत्सङ्गमवाप्नुहि त्वं
असत्प्रसङ्गं त्वरया विहाय ।
धन्योऽपि निन्दां लभते कुसङ्गात्
सिन्दूरबिन्दुर्विधवाललाटे ॥

षष्ठः कविः—महाराज ? एका समस्या महाराजेनापि देया इति वयं समीहामहे ।

राजा—यद्येवमभिलाषस्तर्हि एका समस्या दीयते मया । पूर्यताम्, समस्या अस्ति—

"तिलतुषपुटकोणे मक्षिकोष्ट्रं प्रसूता"

षष्ठः कविः—(गाम्भीर्यमभिनीय) देव अहमस्याः पूर्तिं करोमि—

मृगशिशुनयनाया अक्ष्मि-पक्ष्म-प्रकोणे
विलसति तरला या तारका तारकेव ।
प्रतिफलित इहोष्ट्रे भ्रान्तिरास्ते जनानां
तिलतुषपुटकोणे मक्षिकोष्ट्रं प्रसूता ॥ १

१—सुभाषितरत्नभडागारम् ।

(सर्वे विस्मयं नाटयन्ति)

विदूषकः—(साश्चर्यम्) महाराज ! सर्वेपि कुशलाः कवयः सन्ति। मया पुनर्ज्ञातं इमेऽपि कपयः एव ।

राजा—तर्हि विधीयतां कविजनोचितः समादरः एतेषाम् ।

विदूषकः—गृह्यतां भोः इदं मदीयं कर्पटम् । (सर्वे हसन्ति)

कवयः—महाराज ! न वयं कवित्वविक्रेतारः । केवलं भवन्तः साहित्यमर्मज्ञा इति कृत्वा इहागमानमस्माकम् । यतो हि—

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः कोऽरविन्दानां अन्तरेण मधुव्रतम् ॥

राजा—महानेष कृपाभावो भवताम् । (सर्वे गच्छन्ति)

(पटाक्षेपः)

२०—पुरोहितानां वृत्तिः

(अनेकान् महतो लघूंश्च अन्नग्रन्थीन् वहन् अवलोकयंश्च एकः प्रसन्नमनाः पुरोहितः प्रविशति)

पुरोहितः—(प्रसन्नो भूत्वा स्वगतम्) आः अद्य बहूनि वस्तूनि मिलितानि ! इमानि तण्डुलानि सन्ति । इयं दालिः अस्ति । इदं शाकं वर्तते । एतानि लड्डुकानि सन्ति, इमानि बालकेभ्यो दास्यामि । इदं न जाने किं वर्तते ? यजमानपत्न्या अत्यादरेण समर्पितम् । (स्मृतिमभिनीय) आँ ज्ञातम्, इदं चणकचूर्णं वर्तते ? तर्हि परमं प्रियं नः । इदं मम गृहिणी चिरात् याचते स्म । दृष्ट्वा अतीव प्रसन्ना भविष्यति । तत् शीघ्रमेव गृहं गच्छामि । (अस्तव्यस्तानि अन्नपुटकानि सम्भालयन् गच्छति)

मित्रम्—(सविस्मयम्) अहो मित्रवर ! अद्य तु भवता बहूनि वस्तूनि प्राप्तानि । किं किं वर्तते ?

पुरोहितः—किं किं कथयामि । अनेकानि वस्तूनि सन्ति ।

मित्रम्—कुत्र इदं सर्वं लब्धम् ? किम् एकस्यैव यजमानस्य गृहे ?

पुरोहितः—ओम्, एकस्यैव यजमानस्य गृहे । परितो विलोक्य मन्दं मन्दम्) कारणम् इदं वर्तते यत् तस्मिन् ग्रामे कश्चित् विद्वान् नास्ति । यजमानश्च महान् जडः आसीत् । परं तस्य पत्नी अतीव धर्म-विश्वासिनी । अतः मया यत् यत् कथितं तत् तत् सर्वं तया समर्पितम् । शिक्षितानां गृहे एतावत् न मिलति । मूर्खाणामेव गृहे तु पुरोहितानां पाण्डित्यं चलति । शास्त्रे लिखितं वर्तते—

ग्रामे न विद्वान् जडता प्रभोश्च
विश्वासिनी तस्य च धर्मपत्नी ।
एवं यदि स्यादखिलं तदानीं
बृहस्पतिस्तत्र पुरोहितः स्यात् ॥ १

मित्रम्—(किञ्चिद् विहस्य) परन्तु अस्मिन् युगे पुरोहितानामियं वञ्चना चिरकालं न चलिष्यति ।

पुरोहितः—आः अग्रे भगवान् वर्तते । यद् भविष्यति तद् भविष्यति । (किञ्चिद् गत्वा पुनः परावृत्य) पुनश्च, मित्र ! अस्माकं पुरोहितानामेव को दोषः । इदानीं तु सर्वेऽपि मूर्खजनताया वञ्चनां कुर्वन्ति । वणिजः ग्राहकान् वञ्चयन्ति, डाक्टरा रोगिणः वञ्चयन्ति, साधवः शिष्यान् वञ्चयन्ति, नेतारश्च सर्वानपि जनान् वञ्चयन्ति !

(उभौ गच्छतः)

———

१—डमरुकम् ।

२१—यथा प्रश्नस्तथोत्तरम्

(अनेकैः वटुभिः सह एकः अध्यापकासने उपविष्टः अस्ति ।)

गुरुः—सर्वे वटवः समागताः ?

प्रथमः—आम्, सर्वे समागताः ।

गुरुः—तर्हि पठत—टिड्ढाणञ्द्वयसज्..... ।

(छात्राः नासिकां भ्रुवं च आकुञ्चन्ति)

द्वितीयः—गुरो ! अद्य सूत्राणां रटनेन अस्माकं शिरसि वेदना जाता ।

तृतीयः—सत्यं गुरो ! इदानीं सूत्राणां पठने मनो न लगति ।

चतुर्थः—वयं सर्वे इदानीम् एकां कथां श्रोतुमिच्छामः ।

अन्ये—आमाम्, कथां श्रोतुमिच्छामः ।

गुरुः—(विहस्य) कथां श्रोतुमिच्छथ ?

प्रथमः—आम्, कथां श्रोतुमिच्छामः ।

गुरुः—अस्तु, तर्हि एकां मनोरञ्जककथां कथयामि । परन्तु युष्माकं मध्ये श्रोता कः भविष्यति ?

द्वितीयः—गुरो ! वयं सर्वेपि श्रोतारः स्म ।

गुरुः—सत्यमिदम् । परं कथायां मुख्यः श्रोता स एव भवति यः हुँ हुँ करोति । (सर्वे हसन्ति)

तृतीयः—तर्हि अस्माकं मध्ये श्रेष्ठः विद्यार्थी मुरारि भाई अस्ति । स एव मुख्यः श्रोता भविष्यति । (सर्वे समर्थयन्ति)

गुरुः—मुरारे तर्हि मम समक्षम् आगच्छ । इदानीं कथायाः प्रारम्भं करोमि । सावधानाः शृणुत ।

सर्वे—सावधानाः स्म ।

गुरुः—मरुस्थल्यां (मारवाडदेशे) एकः सोलोकनामा ग्रामः

आसीत् । तत्र अनेके भौतिकाः (भूतप्रेतपूजकाः) निवसन्ति स्म । ते सर्वेऽपि परमनिरक्षरा आसन् । एकदा ते एकस्य यजमानस्य गृहे पूजा-ग्रहणार्थं चलिताः । तदा तैः सह एकः पण्डितोऽपि चलितः । बुध्यते ?

सर्वे—आम्, बुध्यते ।

गुरुः—एवं प्रकारेण यजमानस्य गृहं गच्छतां तेषां यदा मध्याह्न-कालः संजातः तदा तेषां बुभुक्षा लग्ना । ते भोजनार्थं सर्वत्र अवलो-कयन्ति, परं किमपि न मिलति । न अन्नं मिलति, न फलं मिलति । सर्वे बुभुक्षया छटपटायमानाः सन्ति ।

सर्वे—हसन्ति ।

गुरुः—ततः संयोगवशात् तेषां दृष्टिः एकस्मिन् धान्यक्षेत्रे पतिता । तत् धान्यक्षेत्रं दावाग्निना दग्धम् आसीत् । तेन कारणेन तस्मिन् धान्य-क्षेत्रे केचन काकाः (कौआ) अपि ज्वलिताः आसन् । ततः ते सर्वे भौतिकाः तान् काकान् एव गलं मोटयित्वा खादितुं प्रवृत्ताः ।

सर्वे--(सघृणम्) आः काकान् खादितुं प्रवृत्ताः ? हन्त !

पञ्चमः—महान्तः राक्षसाः आसन् ।

गुरुः—इदं दृष्ट्वा पण्डितेन कथितम्—अरे रे पापाः, किं कुरुत ? प्रथमं तु मांसम् एव अभक्ष्यं वर्तते । तत्रापि काकानां तु विशेषरूपेण । तत् कथमिदं कार्यं कुरुथ ।

मुरारिः—हुँ । ततः किं तैः कथितम् ?

गुरुः—श्रूयताम् । ततः पण्डितं प्रति उक्तम् । भोः पण्डित ! कथम् अस्मान् आक्षिपसि ? काकास्तु खाद्याः लिखिताः सन्ति । पण्डितेन कथितम् । कुत्र लिखितं वर्तते ? तैः कथितम् । वर्णमालायाम् । पण्डितेन कथितम् । कथम् ? ततः तैः कथितम्—वर्णमालायां लिखितं वर्तते क ख ग घ ङ इति । तत्र क इत्यस्य अर्थः काकाः, ख इत्यस्य अर्थः खाद्याः,

ग इत्यस्य अर्थः गलं मोटयित्वा, घ इत्यस्य अर्थः घनाः (बहवः), तथा ङ इत्यस्य अर्थः ङ अक्षरवत् हस्तं वक्रीकृत्य ।

सर्वे—वारं वारं हसन्ति ।

षष्ठः—अतीव विचित्रः अर्थः कृतः !

द्वितीयः—अयम् अर्थः अस्माभिः कदापि न पठितः !

गुरुः—श्रूयताम् ? ततः पण्डितेन विचारितम् । इमे मूर्खाः सन्ति । एते यथा कल्पितं प्रमाणं ददते तथैव मयापि किञ्चित् प्रमाणं दातव्यम् । इदं विचार्य पण्डितेन कथितम्—भो भौतिकाः ! केवलं 'कखगघङ' इत्येव वर्णमालां जानन्ति अथवा अग्रेऽपि जानन्ति । तैः कथितम् — अग्रे किं वर्तते । तदा पण्डितेन कथितम्—श्रूयताम्, अग्रे वर्णमालायां लिखितं वर्तते त थ द ध न इति । तत्र तथ इत्यस्य अर्थः अस्ति— तथापि, दघ इत्यस्य अर्थः अस्ति–दग्धाः तथा न इत्यस्य अर्थः अस्ति– न भक्षणीया इति । अर्थात् यद्यपि काकाः खाद्याः तथापि दग्धाः न खाद्या इति तस्यार्थः अस्ति । सर्वे हसन्ति ।

प्रथमः—यथा प्रश्नस्तथोत्तरम् ।

द्वितीयः—पण्डितः महान् चतुरः आसीत् ?

गुरुः—ततः पण्डितस्य इदं वचनं श्रुत्वा ते सर्वे भौतिकाः काक-भक्षणं परित्यक्तवन्तः । एषा कथा समाप्ता, सर्वं गेहं प्राप्ताः ।

एकः—गुरो ! अस्याः कथायाः किं तात्पर्यं वर्तते !

गुरुः—इदं तात्पर्यं वर्तते यत् यः येन प्रकारेण बुध्यते स तेनैव प्रकारेण बोधनीयः ।

यो येन बुध्यते कार्यं तं तथा बोधयेद् बुधः ।

गच्छत इदानीम् । पुनः कालान्तरे पाठः पठनीयः ।

(सर्वे प्रणम्य प्रसन्नमानसा गच्छन्ति)

(भरटकद्वात्रिंशिका)

———

अहो चलचित्रदर्शकाणां पुरुषार्थः ?

(केचन युवानो बालका विद्यार्थिनश्च चलचित्रमवलोकयितुं त्वरितगतयः गच्छन्ति)

एकः भद्रयुवकः—(सचकिलम्) अरे रे कुत्र एवं धावमाना गच्छथ ?

एकः बालकः—(सोल्लासम्) वयं चलचित्रमवलोकयितुं गच्छामः ।

द्वितीयः बालकः—श्रूयते अद्य अतीव चमत्कारपूर्णं चित्रं समागतं वर्तते ।

तृतीयः बालकः—सत्यमेवैतत् । मया गतदिने एव श्रुतम् ।

(पुनस्त्वरया गच्छन्ति)

भद्रयुवकः—अरे श्रूयतां श्रूयताम्, विरम्यतां किञ्चित्.....

चतुर्थः बालकः—सखे, विरामस्य अवसरः नास्ति ।

प्रथमः बालकः—यदि विलम्बः क्रियते, चिटिकाग्रहणे महती बाधा भवेत् । तत् क्षम्यतामिदानीम् ।

द्वितीयः बालकः—पुनरागमिष्यामः ।

(सर्वे द्रुतं गच्छन्ति)

भद्रयुवकः—(सविस्मयं सविषादञ्च) अहो चलचित्रदर्शकाणां साहसं कष्टसहिष्णुता पुरुषार्थश्च ! इमे खलु अतिकरालेऽपि ग्रीष्मकाले दीपं पतङ्गा इव, अन्नकणं विहङ्गा इव, उत्फुल्लकुसुमकलिकां भृङ्गा इव सकृदेव सहस्रशः "सिनेमा"ऽभिमुखं धावन्ति । ते बलिभिः निष्पिष्यमाणा अपि तथा परस्परं घृष्यमाणा अपि (स्मृतिमभिनीय) न केवलम् एतावदेव, रक्षिणां कशाघातैः आहन्यमानाः तथा कष्टशतानि सहमाना अपि गवाक्षनिकटे प्राप्तुं प्रयतन्ते । अहो हो, इमे खलु संघर्षवशाद् विशीर्यमाणवसना अपि, पिपासाकुलतया शुष्यद्रसना अपि व्यसनाभि-

भूततया उद्ग्रीवा लम्बायमानहस्ताः श्वसन्तः, कलहायमाना युद्धयन्तश्च यावत् चिटिका न लभ्यन्ते तावत् नैव निवर्तन्ते। आश्चर्यं भवति एतेषां धैर्यमवलोक्य ! एते तपस्विन इव पञ्चाङ्गुले स्थिताः, वीरा इव बद्धपरिकराः, गृहीतपञ्चाग्नय इव प्रस्विन्नसर्वावयवाः, ज्ञानिन इव विस्मृतमानापमानाः, योगिन इव निश्चलावयवाः मल्ला इव सुदृढ़वद्धकक्षाः कार्यं वा साधयामि शरीरं वा पातयामीति कृतप्रतिज्ञा इव इतः प्रविशन्तः, ततः प्रविशन्तः, उपर्युपरि आरोहन्तः, छिद्रमात्रमपि अन्वेषयन्तः, कं कं प्रयत्नं न कुर्वते ! अन्ते च गान्धी जी इव सत्याग्रहिणः, विनोवा इव जीवनदायिनः, पटेल इव लौहपुरुषा एते स्वकीयं संकल्पं पूरयित्वैव निवर्तन्ते। लक्षलक्षनागरिकाणां विशेषतश्च नवयुवकानामेषा दैनिकी स्थितिः ! भारतवसुन्धरे धन्याऽसि ! एतादृशी सहिष्णुता, एतावान् श्रमः, ईदृशः पुरुषार्थः, ईदृशी च तल्लीनता यदि भारतीये नवयुवकसमाजे समागता तर्हि पराहता एव सर्वा विपत्तयोऽस्माकम् !

(विषादमभिनीय निष्क्रान्तः)

विद्यालये विलम्बादागमनस्य कारणम्

(अध्यापकः एकाकी कक्षायामुपविष्टः अस्ति। छात्राश्च सर्वेऽपि विलम्बादुपस्थिता भवन्ति)

अध्यापकः—(स्वगतम्) अद्य एतावती वेला संवृत्ता परन्तु एकोऽपि छात्रः उपस्थितो न जातः। (छात्रान् दृष्ट्वा)

अरे, अद्य कथं सर्वे छात्रा विलम्बेन समागताः सन्ति ? किं कारणं वर्तते ? महेश ? कथं विलम्बेन समागतोऽसि ?

महेशः—मम सर्वाणि वस्त्राणि मलिनानि आसन्। अद्य तान्येव अहं प्रक्षालयितुं लग्नः।

अध्यापकः—माधव ! त्वं कथं विलम्बं कृतवान् ?

माधवः—गुरो ! मम केशवस्य च मार्गे विवादो जातः तेन उभयोरपि विलम्बः अभूत् ।

अध्यापकः-वीरेश्वर ! तव कथं विलम्बो जातः ? सत्यं सत्यं कथय ।

वीरेश्वरः—मम ग्रामात् अर्धक्रोशपर्यन्तं भूमिः सम्प्रति केवलं जलमयी जाता वर्तते । अतएव मम विलम्बो जातः । इदमेव सत्यं वृत्तं वर्तते ।

अध्यापकः—तव विलम्बस्य किं कारणम् ?

रघुवरः—मम गृहे अद्य प्रातरेव केचन अतिथतः समागताः । ततः तेषामेव सत्कारे मम विलम्बो जातः ।

अध्यापकः—प्रमोद ! अथ त्वया कथं विलम्बः कृतः ।

प्रमोदः—गुरुवर ! गतदिने पादकन्दुककीडायां मम दक्षिणे पादे कश्चित् आघातो लग्नः । तेन अहं मन्दं मन्दमागच्छन् अस्मि ।

अध्यापकः-एकस्मिन् एव दिने सर्वेषामपि सर्वा बाधाः समुत्पन्नाः ? यदि कदाचिदद्य निरीक्षकमहोदयः समागतः स्यात् ? इयं विलम्बेन आगमनस्य रीतिः शोभना नास्ति । गच्छत पुनरेवं न कर्तव्यम् ।

(सर्वे निष्क्रान्ताः)

अक्षरलेखनस्य अभ्यासः

(अध्यापकः सुन्दराक्षरलेखनाय छात्रान् आदिशति छात्राश्च विभिन्नैः कारणैरसमर्थतां प्रकटीकुर्वन्ति)

अध्यापकः—भो विद्यार्थिनः ! अद्य सर्वे यूयं अक्षराणि लिखत । पश्यामि अहम्, कस्य कीदृशानि अक्षराणि भवन्ति ।

राघवः—गुरो ! श्वो लेखिष्यामः ।

अध्यापकः—कथम् ? अद्य कथं न लिख्यते ?

नरेन्द्रः—अद्य मम समीपे लेखनी नास्ति ।

सुरेन्द्रः—मम समीपे तु वर्तते परं समीचीना नास्ति। श्वः समीचीनाम् आनेष्यामि।

वीरेन्द्रः—मम लेखन्या जिह्वा एव त्रुटिता वर्तते। श्वः नवीनां क्रेष्यामि।

हरेन्द्रः—गुरो! अहमपि अद्य लेखने असमर्थः अस्मि।

अध्यापकः—किं तवापि लेखनी नास्ति?

हरेन्द्रः—नहि; लेखन्यस्तु अनेकाः सन्ति परं लिपिपुस्तिका मे नास्ति।

अध्यापकः—किं निर्मितैव नहि?

हरेन्द्रः—निर्मिता कथं न। परं अद्य गृहे एव परित्यक्ता।

अध्यापकः—किशोर! तव कीदृशी दशा?

किशोरः—ममापि दशा शोभना नास्ति। मम मसी एव अद्य केनापि पातिता।

अरुणः—मम तु सर्वं सम्पन्नं वर्तते परं न जाने कथं मे अद्य मसीपत्रे परितः प्रसृता भवति।

विहारी—क्षम्यतामद्य। आगामिनि दिने वयं मसीपात्रं मसीं लेखनीं लिपिपुस्तिकां चेति सर्वं समीचीनं आनेष्यामः। तदा यथादेशं सर्वं लेखिष्यामः।

अध्यापकः—अस्तु क्षम्यते अद्य। गम्यताम्। परं आगामिनि दिने कस्यापि अपराधः क्षन्तव्यो न भविष्यति।

(स्वगतम्) एतादृशानां बालकानामध्यापनमपि एका विपत्तिरेवास्ति।

(निष्क्रान्तः)

Jagadguru Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bhanapur
285

Śrī Śaṅkarācārya
Śāradāpīṭha
Bharatīya Vi